नं० ६२६ – घ

वासिष्ठी शान्तिः (धर्मशास्त्रम्)

16-23, 27, 28 नं० २६ – घ

५-६ पत्राणि ५-६ (अपूर्णम्)

नं० ६२६ – च

वासिष्ठी शान्तिः (धर्मशास्त्रम्)

(अपूर्णम्) ५९ पत्राणि ~~६६~~ ५९ (अपूर्णम्)

वाशिष्ठीशांतिपद्धतिः प ६९

नं० १२५

वासिष्ठी शान्ति

५१

वा.से.
१

॥ श्रीगणेशाय नमः ॥ अथ विस्तरेण शांतिविधिर्लिख्यते ॥ ॥ प्रणम्य परया भक्त्याहं हंसयानां सरस्वतीं तस्याः प्र
सादमासाद्य वक्ष्येऽहं शांतिमुत्तमं ॥ तत्रादौ वशिष्ठशांतेरनुक्रमणिका स्थापनं स्वस्तिपाठश्च लक्ष्मीसूक्त
मनंतरं ओंकारः पंचधा प्रोक्तो गणयागो गणे[श्व]रः ॥१॥ नास्त्यनुक्रमपूजे च मातरो मातृपूजनं वृद्धिश्राद्धं च व
रुणम् ऋत्विजां च पृथक् पृथक् ॥२॥ रक्षाविधिः कुशंडी च कलशोत्पत्तिश्च पूजने न्यासः षडंगमावाह्य लो
कपालान्नवग्रहान् ३ अधिप्रत्यधिभूतान्म दिक्पालानवास मंडले होमश्च बलिदानं च मंडलाची ततः
परं ४ वेदपाठो ग्रहस्तोत्रं द्विजानां तर्पणं ततः ॥ पूर्णाहुत्यभिषेकौ च ततो यत्त्र दक्षिणा ॥५॥ नमस्का
रस्तथाच्छिद्रं विसर्जनमतः परं शांतेरनुक्रमश्चायं कृतो मिश्रगदाधरैः ॥६॥ इति वशिष्ठशांत्यनुक्र
मणिका अथ स्थापवक्ष्ये यो यत्र ग्रहदेवताः ॥ मंडलं च ततः कुर्यात्सर्वतोभद्रमुत्तमं ॥१॥ व्रते चू
डे च भद्रं च स्वस्तिकं तु विधीयते विवाहे दोलिखेन्नित्यं तिलकं नाम मंडलं ॥२॥ ततश्चाष्टदलं पद्मं मध्ये
कृत्वा तु शोभनं द्विजेन वृत्तिना कार्यं पंचवर्णादिसंयुतं ३ मध्ये तु भास्करं विंद्यात् शशिनं पूर्वदक्षिणे
दक्षिणे लोहितं विंद्यादीशाने च बुधं न्यसेत् ॥४॥ उत्तरस्यां गुरुं विद्यात्पूर्वस्यां दिशि भार्गवं पश्चिमा

यां प्रति विंद्यात् द्राडुं नै ऋत्यके न्यसेत् ॥५॥ केतुं तु वायुदिग्भागे स्थापयेद्ग्रह मंडले भास्करांगारकौ रक्तौ श्वे
तौ शुक्र निशाकरौ ६ गुरुर्हि मांश्च पुत्रश्च तानु मोपीतकौ स्मृतौ कृष्णवर्णो भवेच्छौरी राहुकेतू द्विधूम्रकौ ॥७॥
नक्षत्रमंडलं धूम्रमेवं कुर्याद्विचक्षणः ॥ चतुर्लं भास्करं कुर्यादर्धचंद्रं निशाकरं ॥८॥ त्रिकोणं मंगलं स्था
प्य चंद्रजं पूर्वं लवन्न्यसेत् ॥ पमाकृतिं गुरुं विद्याच्चतुः कोणं तु भार्गवं ॥९॥ चापाकृतिं लिखेच्छौरिं राहुं चतु
भुजमाकृतिं केतुं ध्वजाकृतिं चैव स्थापयेद्ग्रहरूपकं १० आलणो भार्गवा चार्यौ क्षत्रियौ रविलोहितौ वै
श्यौ सोमबुधौ ज्ञेयौ शेषाः शूद्राः प्रकीर्तिताः ११ सौवर्णं भास्करं कुर्याद्द्विजतं रजनीपतिं ताम्रमंगारकं चैव
कांस्यं चंद्रतनू द्भवं १२ हेमं निंदिंद्यात् सुराचार्यं आयवं भार्गवं न्यसेत् आयसं तु शनिं विद्याद्राहुं काचमयं तत
था ॥१३॥ शशीकं तु तथा केतुं मृत्पीकारा इमे मताः ॥ अंगारको भवेद्बालः किशोरस्तु बुधस्मृतः ॥१४ शु
क्रो युवा च गदितो मध्यमस्तु बृहस्पतिः मध्यातिरिक्तः सूर्यस्तु किं चिद्धीनतनुः शशी ॥१५॥ हस्तं शनैश्च
रं विद्याद्राहुकेतु तथैव च द्वादशांगुलिकः सूर्यो दिग्गणश्चंद्रमा मतः ॥१६॥ चतुरंगुलिको ज्ञेयो कुनाम्रू
मिहि मांशुजो ॥ गुरुं षडंगुलं न्यस्य भार्गवं तु नवांगुलं ॥१७ ॥वेदांगुलि लिखेच्छौरिं तत्वसंख्यांगुलं तमः

द्वादशांगुलिकं केतुं लिखेद् विधानप्रयत्नतः ।१८ प्रुक्कार्यौ सा सुखौ कार्यौ गुरुसोमौ बुधश्च खौ प्रत्य-
ङ्मुखौ सोमशनी शेषा दक्षिणतोमुखाः ॥१९॥ वर्णरूपप्रमाणेषु ज्ञात्वा ध्यायेत्सर्वा दिशि लेखयेत् इत्थमावेष्टना
कार्या धान्यैर्वर्णैर्विशेषतः ॥ २०॥ सितपाकरणी पावाप्या त्विते ः शालितण्डुलैः रवेरुत्तरतो रुद्रः सोमा-
दाग्नेयगा तु मा २१ भौमाद्याम्यगः स्कन्दो बुधात्स्वर्वैतु केशवः ॥ गुरोरुत्तरतो ब्रह्मा भृगोः पूर्वे पुरन्दरः ॥२२
यमः शनेः पश्चिमे तु राहोः कालस्तथोत्तरे केतोश्च वातदिकोणे चित्रगुप्तं तु विन्यसेत् ॥ २३ ॥ रुद्रो ब्रह्मा भ-
वेत्तत्र उमा रक्ता तथैव च पीतमिन्द्रं तथा स्कन्दं कृष्णो विष्णुर्यमो विदुः ॥२४॥ कालं न्यसेत् धूम्रवर्णं चित्रगुप्तं तु
लोहितं एतेव वर्णाः समाख्याताः कविनाधिदेवी कर्मा ॥२५॥ रुद्राग्ने यस्थितो वह्निरुमा याति करेज-
लं स्कन्दाग्न्यर्णे धरं न्यस्य विर्मो बैवि भुरुत्तरे ॥२६॥ ब्रह्मोत्तरगतः शक्रं इन्द्राणी चैन्द्रपूर्वगा यमस्य या-
म्ये लोकेशः पूर्णी कालस्य दक्षिणे ॥२७॥ चित्रगुप्तस्य पूर्वे च सुरज्येष्ठ प्रकीर्तितः ॥धराऊ ताशनो रक्तो
पीतं इन्द्रपुलोमजे ॥२८॥ कृष्णो केशवश्च वसर्पौ च श्वेता रायः प्रजापतिः ।ब्रह्माणं काश्यसंज्ञा शं स-
म्यकु र्याद्विचक्षणः २९ वर्णभेदः समाख्याताः स्याप्यप्रत्यधिदेवताः ।गणेशं लोकपालांश्च स्था-

पर्येद् ईशकोणतः ॥ ३० ॥ ईशाने कलशं स्थाप्य सोंकारादीश्च सर्वशः उत्तरे मातरः स्थाप्या आग्नेय्यां यो
गिनीगणाः ३ अश्विन्यादीनि पूर्वादौ सप्त सप्त स्वनुक्रमात् विघ्नं मादय ऐशान्यादि भुयोगा अनुक्रमा
त् ॥ ३२ श्रीलक्ष्मीश्चैव वचतुः कोणे प्रश्री गोमादिकान्न्यसेत् ॥ ईशानपूर्वयोर्मध्ये द्वादशार्कान् प्रपूजयेत्
॥ ३४ इन्द्राग्निकोणयोर्मध्ये विश्वेदेवालयो दश । आग्नेययाम्ययोर्मध्ये स्थाप्याः पर्येत्पितृदेवताः ॥ ३५ ॥ या
म्यनैर्ऋत्ययोर्मध्ये नागराजं प्रपूजयेत् नैर्ऋत्यवारुण्योर्मध्ये सागरान्सप्त पूजयेत् ॥ ३६ ॥ वरुणवाय
व्ययोर्मध्ये मरुतान्मानमतं स्थापावायोरुद्रदिशोत्तरे ईशानयोर्मध्ये रुद्रानेकादश न्यसेत् अगस्तिर्दक्षि
णे ध्रुवमुत्तरतो न्यसेत् ॥ ३७ ध्रुवं प्रदक्षिणीकृत्य मरीच्याद्याः ऋषीश्वराः ॥ ऋग्वेदाद्याश्चतुर्दिक्षु पूर्वा
दिषु यथाक्रमं ॥ ३८ ॥ आवर्तादीश्चतुर्मेघांश्चतुर्दिक्षु प्रपूजयेत् सरिद्वनस्पतीन् मेरुमुदीच्यांदिशि
पूजयेत् ॥ ३९ ॥ इन्द्राद्यालोकपालांश्च स्वां स्वां च दिशमाश्रितान् ॥ ग्रहाणां स्थापनं सर्वं वशिष्ठेन प्र
कीर्तितं ॥ ४० ॥ पुनश्चान्यत्प्रवक्ष्यामि दिशां वर्णा यथोदिताः मध्ये श्वेतं तथा रक्तं पीतं कृष्णं च पूर्वतः ॥ ४१
पीतमिन्द्रं तथा वायुं रक्तं यमहुताशनं । सितो वरुणसोमौ च कृष्णं रुद्रं यमं विदुः ॥ ४२ ॥ कनिष्ठिका

प्रमाणेन रेखाः कुर्याद्दिव्यलक्षणाः स्थूलाः सूक्ष्मा न कर्त्तोपदिष्टब्रूय आत्मनः ॥ इति ग्रहादिस्थाप
नम् ॥ तत्रादौ स्नानसंध्यादेवार्चनवैश्वदेवान्तं कर्म कुर्यात् वृद्धावादौ प्रायश्चित्तं मध्ये जुहूति पर्वणि ॥
एकोद्दिष्टे तथा चान्ते वैश्वदेवो विधीयते ॥ अथ स्वस्तिपाठः तद्यथा ॐ यजमानः प्राङ्मुखोपविष्टः
॥ ऋत्विक्सम्भवाब्राह्मणेभ्यः प्रणयात् स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति
नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥१॥ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे
पयो धाः पयस्वतीः प्रदिशः सन्तु मह्यम् ॥२॥ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि वि
ष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ॥३॥ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो दे
वता रुद्रा देवता आदित्या देवता मरुतो देवता विश्वे देवा देवता ॥ बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥४॥
द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वे देवा
ः शान्तिर्ब्रह्म शान्तिरेव शान्तिः सर्वं शान्ति शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥५॥ विश्वानि देव सवितर्दु
रितानि परासुव ॥ यद्भद्रं तन्न आसुव ॥ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेनजरा

भवतेनयज्ञपतिंतेनमाभव:॥६॥ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमंतनोत्वरिष्टं यज्ञꣳ समिमं दधा
तु विश्वेदेवास इह मादयंतामोंप्रतिष्ठ ॥७॥ एषवैप्रतिष्ठानामयज्ञो यत्रैतेनयज्ञेन यजंते सर्वमेवप्रतिष्ठितं भवति
॥८॥ गणमस्यादीनांप्रति~ रतिस्वस्तिपाठपूर्वकं प्रतिष्ठा॥ अथलक्ष्मीसूक्तं॥ ॐ हिरण्यवर्णांहरिणीं सुवर्णर
जतस्रजां चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह॥१॥ तांमआवहजातवेदो लक्ष्मीमनपगामिनीं यस्यांहिर
ण्यंविंदेयंगामश्वंपुरुषानहं ॥२॥ अश्वपूर्णांरथमध्यांहस्तिनादप्रबोदिनीं श्रियंदेवीमुपह्वये श्रीर्मादेवी
जुषतां॥३॥ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं ॥ पद्मेस्थितांपद्मवर्णांतामिहोपह्वये
श्रियं ॥४॥ चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदारां तांपद्मनेमिं शरणंप्रपद्ये अलक्ष्मीर्मे
नश्यतां त्वांवृणोमि॥५॥ आदित्यवर्णेतपसोधिजातो वनस्पतिस्तववृक्षोथबिल्वः। तस्यफलानितपसा
नुदंतुमायांतरायाश्चबाह्या अलक्ष्मीः॥६॥ उपैतुमांदेवसखः कीर्तिश्चमणिनासह प्रादुर्भूतोस्मिराष्ट्रे
स्मिन्कीर्तिमृद्धिंददातुमे॥७॥ क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं॥ अभूतिमसमृद्धिंचसर्वांनिर्
णुदमेगृहात् ॥८॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ईश्वरींसर्वभूतानांतामिहोपह्वये श्रियं॥९॥

मनसः काममाकूतिं वाचसत्यमशीमहि ॥ पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १०॥ कर्दमेन प्रजाभू-
ता मयि संभ्रम कर्दम ॥ श्रियं वासय मे कुले घी॰ गृहे मातरं पद्ममालिनीं ॥ ११ ॥ आपः सृजंतु स्निग्धानि चिक्ली-
त वस मे गृहे। नच देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीं ॥ सूर्यां
हिरण्मयीं लक्ष्मीं जातवेदो मम आवह १३ आर्द्रां पुष्करिणीं यष्टिं सुवर्णां हेममालिनीं चंद्रां हिरण्मयीं ल-
क्ष्मीं जातवेदो मम आवह ॥ १४ ॥ तां म आवाह जातवेदो लक्ष्मीमनपगामिनीं यस्यां हिरण्यं प्रभूतं गावो दा-
स्योऽश्वान् विंदेयं पुरुषानहं ॥ १५ ॥ अश्वदायी गोदायी धनदायै महाधने धनं मे जुषतां देवि सर्वकामांश्च
देहि मे ॥ १६ ॥ पुत्रपौत्रं धनं धान्यं हस्त्यश्वाश्वतरे रथे ॥ प्रजानां भवसी माता आयुष्मंतं करोतु मां ॥ १७ ॥
धनमग्नि धनं वायुर्धनं सूर्यो धनं वसुः धनमिंद्रो बृहस्पतिर्वरुणो धनमुच्यते १८। वैनतेय सोमं पिब तु वृत्र-
हा सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ १९ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ॥ भवंति कृ-
तपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ २० ॥ पद्मानने पद्मऊरु पद्माक्षि पद्मसंभवे तन्मे भजसि पद्माक्षी
येन सौख्यं लभाम्यहं। २१ ॥ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहं श्रियः पंचदश र्चं च श्रीकामः

सततं जपेत् ॥२२॥ श्रीर्वर्च्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते धान्यं धनं पशुपुत्रलाभं शतसंव
त्सरं दीर्घमायुः ॥२३॥ य आनंद समाविशादुपधाव न्विभावसुः श्रियः सर्वा उपसिषध्वि क्लीतवसोगृ
हे ॥२४॥ कर्दमेन प्रजाः श्रेष्ठाः संभूतिगमयामसि आदधादुपगां देशं कामं संसत जहे तवे ॥२५॥ जाग
वे दापुनीहिमां रायस्पोषं धारय । अग्निर्मातस्मा देनसो विश्वा मुंच त्वं हसः ॥२६॥ आछामोमिह्रो देवो
देवानग्निवो चसुमतिं रोधसे विदिस्वस्तिमुष्यि । तिंदेवो निंयेशो आहांसि दुरितात्तरे मृतवानसात्तरेम ॥२७॥
इति लक्ष्मीसूक्तं ॥ अथ संकल्पः । देशकालौ स्मृत्वा अमुक कर्मनिर्विघ्नसमाप्त्यर्थं गणेशपूजनमहं क
रिष्ये पत्ति । ॐ गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे निधीपतिं हवामहे ।
वसो मम आहमजानि गर्भधमा त्वमजासि गर्भधं भगवन् गणपते इहागच्छेह तिष्ठ इत्यावाहनं गं ग
णपतये नमः । इत्यर्घः इदं पाद्यं गणपतये नम इति पाद्यं । इदमाचमनीयं गणपतये नम इत्याचमनं ॥
इदं स्नानीयं गणपतये नम इदं स्नानं पुनराचमनीयं गणपतये नम ॥ इति पुनराचमनं । श्रीखंडचं
दनं दिव्यं मलयाद्रिसमुद्भवं विलेपनं सुरश्रेष्ठप्रीतितः प्रतिगृह्यतां कुंकुमं कामदं दिव्यं कामनाका

५ मसंभवं। कुंकुमेनार्च्चितो देव अतः शांतिं प्रयच्छ मे गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ईश्वरीं सर्व
भूतानां तामिहोपह्वये श्रियं॥ गणपतये नमः इदमनुलेपनं॥ सुजातो ज्योतिष. कं ११। ५० रितिसूत्रं
॥ असल्लमीमदं तहेव प्रियाः अधूपत असोष तस्व भानवोच्चि प्रानविष्ट यामत्तो घोजान्विं द्रते हरी
। गणपतये नमः अक्षतान् समर्पयामि पल्या वहो एत्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं। इष्णं निषाण
मुं मइषाण सर्वलोकं मइषाण गणपुष्पाणि धूरसि धूर्व्व तं धूर्व्वतं यो स्मान्धूर्वति तं धूर्वयं वयं धूर्वाम। दे
वानामसि वह्नितमं सस्नितमं पप्रतिमं जुष्टतमं देवहूतमं वनस्पतिरसो दिव्यो गंधाढ्यः सुमनोहरः। आ
घ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां गण. धूपं स. अग्निर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योति
सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ज्योतिः सूर्यः सूर्यो ज्योतिः स्वा
हा सुप्रकाशो महातेजाः सर्वतस्तिमिरापह सबाह्याभ्यंतरज्योतिर्दीपोयं प्रतिगृह्यतां। गणपत. दी
पंस. । अन्नपतेन्नस्य नो धेह्यनमीवस्य शुष्मिणः। प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ग
ण. । नैवेद्यं. याः फलिनीर्या अफलाः अपुष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहः

हसः गण॰ मुखवासं स॰ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणां। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्य
माप्यते नागवल्ली दलं श्रेष्ठं पूगीफलसमन्वितं। कर्पूरेण समायुक्तं तांबूलं प्रतिगृह्यतां गण॰ तांबूलं हि
रण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हवि
षा विधेमः। गण॰ दक्षिणां। एतद्गणपति पूजनं। यत्कृतं तेन श्रीगणपति देवता प्रीयतां॥ इति पूजासम
र्पणं॥ अथ प्रार्थनाम् सुमुखश्चैकदंतश्च कपिलो गजकर्णकः। लंबोदरश्च विकटो विघ्ननाशो विनाय
कः। धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि विद्यारंभे
विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नं तस्य न जायते। वक्रतुंड महाकाय सूर्यकोटिस
मप्रभ। अविघ्नं कुरु मे देव सर्व कार्येषु सर्वदा इति गणेशपूजनं अथोंकारोत्पत्तिः अथातः संप्रव
क्ष्यामि ॐकारस्य समुद्भवं यं श्रुत्वा सर्वपापेभ्यो मुक्तो भवति मानवः १। त्रिमात्रशब्दनयः शब्दो घोषो वे
देषु पठ्यते तं शब्दं यो न जानाति ब्राह्मणः स कृतः स्मृतः ।२। अकारश्च मकारश्च विलक्षणः यः सदा
तिष्ठते शब्दः स शब्दः परमोऽव्ययः ।३। अकारं ब्रह्माणो नाभौ उकारं नेत्रे वे हृदि मकारं मूर्ध्नि रुद्रस्य श

६

ष्टं त्रिकं हृत्पंचतुर्थकं ॥४॥ आत्मतत्त्वं तुरीयांतं बिंदुमध्ये व्यवस्थितं येन सृष्टं जगत्सर्वं मृ तंमध्ये व्यव
स्थितं ॥५॥ तस्य मध्ये स्थितं बिंदुं वेत्ति मुक्तः स पातकैः प्रथमं तारकं विद्याद्द्वितीयं दंडमुच्यते ॥६॥ तृती
यमर्द्धचंद्रं च चतुर्थं कुंडलं स्मृतं पंचमं सर्वकं नाम बिंदु पंचसमन्वितं ॥७॥ तारके तु भवेद्ब्रह्मा दंडके
तु हुताशनः ॥ केशवश्चार्द्धचंद्रश्च कुटिले तु महेश्वरः ॥८॥ सदाशिवमये शांते ओंकारे पंच देवताः ओंकारस्य समु
त्पत्तिं जानीते ब्राह्मणो न यः ॥९॥ असंस्कारश्च विज्ञेयो न स ब्राह्मण उच्यते ॥ मूलस्थानं समाधानं प्रभूतं ना
~~त्पत्तिं जानीते ब्राह्मणो न यः~~ भिर्मंडलान् ॥१०॥ प्रबुद्धमुदपद्माभं प्रकाशं कंठतालुगं ॥ प्रवृत्तो नासिका
ग्रेण ॥ तदोंकारो विधीयते ॥११॥ बद्धौंकं बिंदमध्यस्थं बिंदुमध्यस्थं नादमोंकारलक्षणं ॥ओंकारस्य तु ता
ना हे बिंदुर्माता प्रकीर्तिता ॥१२॥ माता चैव तु गायत्री पिता ओंकार एव च ॥ यत्र भूमौ वृषक्षेत्रे या च कैः फ
लकांक्षिभिः काले च विष्णुना ध्यातो बीजं दर्भं पिता बुधैः विधिना ब्रह्मणेनापि संस्मृतः फलकांक्षिणा ॥१४॥
धर्मार्थकाममोक्षाणां योगक्षेमफलान्वितः इत्योंकारसमुत्पत्तिं यः शृणोति द्विजोत्तमः ॥१५॥ सर्वविध
पैहपायानि विष्णुलोकमवाप्नुयात् ॥ इत्योंकारोत्पत्तिः ॥ अथोंकारपूजनं ॥ आवाहयाम्यहं देवमोंका

रं परमेश्वरं । त्रिणेत्रं त्र्यक्षरं दिव्यं त्रिपदं च त्रिदैवतं । अक्षरं त्रिगुणाधारं सर्वाक्षरमयं शिवंत्रणवं प्रणवं
हंसस्थारं परमेश्वरं अनादिनिधनं देवमप्रमेयं सनातनं ।परं परतरं वीर्यं निर्मलं निष्कलं शुभं । एह्येहि जी
वनाध्यक्षं त्वं सान्निध्यो भव मे सदा श्रेयसे यजमानस्य मंत्राणां तारणाय च अयमर्घ इदं पाद्यं धूपोयं प्रतिगृह्यतां
। यज्ज्योतिरूपं परमं विधाता जगत्समस्तं हि भर्ति गोप्ता । यतात्मनो विप्रवरा विदंति यत्तः स्यात्तं कुलरूपं प्रणवं नमा
मि । आ ब्रह्मन्निति मंत्रेण मंडले त्वं समाविश ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इ
षव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा जिष्णू रथेष्ठाः सभेयो युवा
स्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः
कल्पतां ॐ भूर्भुवः स्वः पूर्वे ब्रह्मन्निहागच्छेह तिष्ठ ॐ आवाहयाम्यहं देवीं गायत्रीं वेदमातरम् । चतुर्विं
शाक्षरां सिद्धां सुभगां सर्वदैवतां ॥ शांतिसर्वेश्वरीं देवीं सावित्रीं सुरवंदितां नमस्ते देवेशि नमस्ते परमेश्व
रि । अयमर्घ इदं पाद्यं धूपोयं प्रतिगृह्यतां ॥ गायत्रीछंदमंत्रेण मंडले त्वं समाविश गायत्री त्रिष्टुब्जगत्यनुष्टु
प् इ. त्वया सह इह गुह्लिहाककुस्त्रविभिः साम्यनुत्वा ॐ भूर्भुवः स्वः दक्षिणे गायत्रि इहागच्छेह ति—

वाहयाम्यहं देवं गोवर्द्धनमहागिरिं गोकुलत्राणपरमं गवां मोक्षप्रवर्द्धितं ॥ लक्ष्मीवासं सुरश्रेष्ठं यज्ञसिद्ध्य
र्थहेतवे अयमर्घ इदं पाद्यं धूपोयं प्रतिगृह्यतां ॥ गोमधूमेण मंत्रेण मंडले त्वं समाविश ॐ गोमधूपेणास
त्पा ब्बावग्धात मश्विना वर्ती रुद्रा नृपार्सं ॐ भूर्भुवः स्वः पश्चिमे गां वर्द्धन इहागच्छेह तिष्ठ ॥ ३॥ आवाहया
म्यहं देवीं महासिद्धां महावनां सशैलां सवनस्वर्त्यां सर्वपार्थिवसंयुतां आगच्छ सहसा मातर्महासिद्धिप्रय
च्छ मे मही द्यौरिति मंत्रेण मंडले त्वं समाविश ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतान्नो भरी
मभिः ॐ भूर्भुवः स्वः उत्तरे पृथिवि इहागच्छेह तिष्ठ ।४। अतः परं प्रवक्ष्यामि यज्ञस्यावाहनं शुभं । आवा
हये त्वतो यज्ञं सर्वयज्ञधरं प्रभुं एहि देव जगन्नाथ नपी मयमहाद्युत इष्टिसंतान संपूज्य सर्वोपस्करं सं
युत सहस्रभुज विश्वात्मन् क्रतो कामफलप्रद यज्ञश्रीघ्रमिहागच्छ प्रयच्छ विपुलां श्रियं अयमर्घ इदं
पाद्यं धूपोयं प्रतिगृह्यतां यज्ञ यज्ञेति मंत्रेण मंडले त्वं समाविश ॥ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं
गच्छ स्वाहा ॥ एष ते यज्ञो यज्ञपते सह सूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा ॥ प्रथमं गणपतिः पूज्यो दधि
गोमयसर्षपैः ॥ नवनीताक्षतैः पुष्पैर्दूर्वापल्लवशोभितैः मातृरुहिव्वक लामाक स्वस्तिकं तुह

रिद्रया ॥ कौसुंभाव॰ रथयुक्तस्त्वं समागच्छ गणेश्वर यजमानयज्ञे ऽस्मिन्मंत्राणां तारणाय च गणनाथ समा
गच्छ अस्मिन्यज्ञे शिवो भव भूतप्रेतपिशाचानां सर्वविघ्नानि नाशय आवाहयाम्यहं देवं गणेशं शिवनंदनं । आ
प्रचर्मांबरधरं व्यालयज्ञोपवीतकं । गणको आपरि दत्तं देवं मोदकभोजनं सिद्धविद्याधरैर्वंद्यं गिरिजायाः
प्रियं सुतं । गजवक्त्र समागच्छ सूर्पकर्णत्रिलोचन लंबोदर इहेहेहि पूजेयं प्रतिगृह्यतां सर्वैः सिद्धैः संयु
क्तदेव देव जगद्गुरो आदौ पूजा च कर्तव्या शंभुसूनो महात्मनः यत्किंचिन्मंत्रहीनं च द्रव्यहीनं च यत्तत्तां वि
धिहीनं जगन्नाथ क्रियाहीनं च यत्तथा । परिपूर्णं समस्तं तत्त्वत्प्रसादाद्भविष्यति । सांनिध्यो भव देवेश गण
णनाथ विनायक अर्घमर्घं दं पाद्यं धूपो यं प्रतिगृह्यतां गणानां त्वेति मंत्रेण मंडले त्वं समाविश गणानां
त्वा ॥ अनुलेपनादिकं पूर्ववन्निवेदयेत् ॥ अद्येत्यादि दिनशुद्धिं विधाय अमुककामनया शांतिकर्मणि
पंचोंकारपूजायामनुलेपनादि यद्दत्तं तेनोंकारस्वरूपी यज्ञपुरुषः श्रीनारायणः प्रीणातु ॥ इति
पंचोंकारपूजनं ॥ अथ गणयागः ॥ अथातः संप्रवक्ष्यामि गणयागमुदाहृतं कामिके वाचिके यज्ञे
विवाहे व्रतबंधने आदौ तमीश्वरं पूज्य विघ्नौघविनाशं विनायकं तस्मात्सर्वप्रयत्नेन पूज्य यज्ञकाले समा

८
8

नं मंडलं च ततः कुर्यात्कोष्टच्छदशसंयुतं सिंदूरस्थापितो देव ईशानदिशि संस्थितः । क्रमयुक्त्या ततः
स्थाप्य मार्गमासादिके प्रमुं गणपतिश्चाग्रतः पूज्यः पौषे पश्च विनायकः गजवक्त्रो था माघे भालचंद्रस्त
फाल्गुणे ॥ उपेंद्रश्चैत्रमासे तु वैशाखे विघ्ननाशनः ज्येष्ठे शिवसुतः पूज्य आषाढे हरिनंदनः हेरंबः श्रा
वणे पूज्यो भाद्रे लंबोदरस्तथा आश्विने कार्त्तवीर्यश्च महावीर्यश्च कार्त्तिके विघ्नहा चाधिके मासे ह्येवं पू
ज्यो गणेश्वरः । गंधपुष्पैश्च धूपैश्च कर्पूरैर्यक्षकर्दमैः । कस्तूरीकुंकुमैः शुभ्रैः सिंदूरेण विशेषतः । र
क्तोत्पलदलैः पूज्यो बिल्वपत्रेण केशरैः मालतीकेतकीपुष्पैर्हेमपुष्पैर्विशेषतः रक्तोत्पलदलैः पूज्यो बि
ल्वपत्रेण केशरैः ॥ मालतीकेतकीपुष्पैर्हेमपुष्पैर्विकासितैः अर्घोधूपश्च पादं च रक्तवस्त्रेण छादनं
एवं पूज्यविधानेन दधिमोदकभोजनं नमो देव गणेशाय नमस्ते विघ्ननाशन नमोभूषकमारूढस्तुभक
क्षे नमो नमः । नमः कात्यायनीपुत्र परशुहस्ताय ते नमः ॥ रवेरुदयतो रूपं विघ्नाद्बुद्धिविचक्षणः । देहि
मे रूपसौभाग्यं देहि मे पुत्रसंपदः ॥ पत्रं पुष्पं फलं तोयं रत्नानि विविधानि च गृहाणार्घं मया दत्तं देहि
मे वांछितं फलं रूपं देहि जयं देहि भाग्यं भगवन् देहि मे पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे फ

लेन फलितं सर्वं त्रैलोक्यं सचराचरं फलस्यार्घप्रदानेन सफलोऽस्तु मनोरथः नालिकेरमयं मर्घं समर्प
र्पयामि हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ मंत्रं समु
च्चार्य स्वपेद्कं मोपयत्नतः समुत्थाप्य ब्रह्मचारी जितेंद्रियः ॥ स्नात्वा शुचीपरीधायवासयी कृतमंगलः
गणेशं स्थापयेद्यत्र पूर्णपात्रं तु पाश्चितः आम्रपल्लवसंयुक्तं कलशं स्थापयेत्ततः आच्छाद्याहतवस्त्रे
ण सकुंभं गणनायकं ॥ शत्रुं दुस्तरयोधं च दुर्जनाभंजकाः तेगच्छंति हताद्दंडे गणेशस्य हि पूजनात् ॥ ग
णेशं प्रथमं पूज्य ततः शांतिं समारभेत् न स्पृशंति सर्वदुष्टानि कल्याणानि भवंति हि ॥ कृतेन भाषितं पूर्वं देवतानां
ज्वलंतोंतिके मंगलं तत्र यत्नेषु भक्ति यत्र विनायके ॥ मिहं लोद्धताम्र न्या वीजहीनाय प्याभवेत् ॥ गणयाग
विहीनश्च तस्यायज्ञो भविष्यति । प्रादिने भस्त्ये दाज्यं दंतकाष्ठं विधाय च अपामार्गसमुद्भूतं भूमौ शय्यां
निवेशयेत् ॥ इति गणयागः ॥ ॥ अथ वास्तुस्थापनपूजननम् ईशश्चैव तु पर्जन्यो नयंतश्चेंद्र एव च र
आदित्यश्चैव सत्यश्च भृगुश्चैवांतरिक्षकः एते पूर्वे समाख्याता दक्षिणे कथयाम्यहं अग्निः पूषा वि
वितथो गृहक्षेत्रं यमस्तथा गंधर्वो भृंगराजश्च मृगश्चैव यथाक्रमं । दक्षिणे कथिता ह्येते पश्चिमे त्वं नि

वोधदिपित दौवारिकश्चैव सुग्रीवश्च तथैव च: पुष्पदन्तश्च वरुणो ह्यसुर: शोष एव च॥ पापयक्ष्मा च
वित्र्याता वरुणां दिशि संस्थिता:। उत्तरस्यां प्रवक्ष्यामि देवता मुनिसत्तमा: रोगो नागस्तथा मुख्यो भ्लाट: सो
म एव च। उरगश्च दितिर्विप्रा अदितिश्च तत: शय: मध्ये ब्रह्मा समाख्यात: सर्वलोकपितामह: अर्यमा दे
वता पूर्वायां मध्ये चैव स्वत था मित्रस्तु पश्चिमे तद्वदुत्तरे पृथिवीधर:॥ आपो यवत्स ईशाने वास्तुमध्ये प्र
पूजयेत्सवितारमग्निकोणे च जयं नैऋत्यके तथा। रुद्रश्च रुद्रकामश्च वायव्ये शानयोस्तथा ईशाने च
रकी देवी ह्याग्नेये च विदारिका पूतना नैऋते पूज्या वायव्ये पापराक्षसी स्कन्दं समर्चयेत्पूर्वे दक्षिणे र्य्य
मणं तथा। पश्चिमे जंभक: पूज्य उत्तरे पिलिपिच्छक:॥ हेतुकं पूर्वपीठे तु ह्याग्नेये त्रिपुरान्तकं दक्षिणे चा
ग्निवेतालमग्निजिह्वं तु नैऋते। कालाख्यं वारुणीपीठे वायुव्यां तु करालिनं। उत्तरे ह्येकपादं तु ईशाने भीर
मरूपिणं ज्वालामुखं तु पाताले आकाशे च धमादिनं आजारइति मंत्रेण च तु: बहिः प्रपूजयेत् गृहमध्ये
प्यवेश्यान्यामालिखेद्वास्तुमंडलं॥ तत्र दशरेखाकं मंडलं॥ दशरेखाके मंडले न पदो ब्रह्मा षट्पदा अ
र्यमादय: द्विपदा अष्टौ एकपदो अन्ये॥ नवरेखाके मंडले च तुष्पदो ब्रह्मा त्रिपदा अर्यमादय:॥ अ

न्यस्तं वेतद्धस्तान्नव इति वास्तुस्थापनप्रकारः ॥ अथैषां पूजनं । अथ वेदोक्तमंत्रेण क्रियादौ वास्तु
पूजनं ॥ तमीशानेति मंत्रेण ईशानं तत्र पूजयेत् तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयं
पूषा णो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ पूर्वे द्विपदाय ईशानाय नमः ईशान इहागच्छेह
तिष्ठ ॥१॥ आ ब्रह्मन्निति मंत्रेण पर्जन्यं पूजयेत्ततः । आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे रा
जन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा जिष्णू र
थेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः न्नं
पच्यन्तां योगक्षेमो नः कल्पतां ॥ पूर्वे द्विपदाय पर्जन्याय नमः पर्जन्य इहागच्छेह तिष्ठ ॥ यो नः पिता जयं
चैव महाद्रं द्रो महेंद्रकं यो नः पिता जनिता यो विधाता यो धामानि वेद भुवनानि विश्वा यो देवानां नामधा
एक एव तं संप्रश्नं भुवनानि पल्या ॥ पूर्वे द्विपदाय जयाय नमो जय इहागच्छेह तिष्ठ ॥३॥
महां इन्द्रो नवर्षणिप्रा उत द्विर्हा अमिनः सहोभिः ॥ अस्माद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः क
र्तृभिर्भूत् इति पूर्वे द्विपदाय जयंताय नमः जयंत इहागच्छेह तिष्ठ ॥४॥ आदित्यं गर्भं मदित्यं सत्यं

१०

सत्यश्चमेयथा आदित्यंगर्भपयसासासाम ग्धिसहस्रस्यप्रातिमांविश्वरूपंमापरिहृडि. हारसामसिमछं
स्याःप्रत्तापुवंहृणहिंचीयमानः पूर्वेद्धिपदायसूर्यायनमः स्०।५। सत्यश्चमेश्रद्धाचमेजगच्चमेधनंच
मेमहश्चमेक्रीडाश्चमेमोदश्चमेजातंचमेजनिष्यमाणंचमेसूक्तंचमेसुकृतंचमेयज्ञेनकल्पंतां पूर्वेद्धिपदा
यसत्याय०।६।। भायेएवांसुमंत्रेण मन्त्रांश्चैवप्रपूजयेत ।।।। भायेदावाहारंप्रभायात्र्यधेदं द्व भस्यविद्यापार
गाद्यावीमगुंचेवहव्यं सप्तांतरिक्षच्छं सप्तांतरिक्षकं।। भायेदावीहारंप्रभायात्र्यध्वेदंव्र भस्यविद्यापागा
मिवेत्तारंवर्षिहि र्षिष्टायनाकायपरिवेष्टारंदेवलोकायपेचितारंमनुष्यलोकायप्रकारितारच्छंस्वर्गेस्यो
लोकेम्य उपसेक्तारमस्त्रत्ये वधायोपमंथितारंमेधायवासमः।।पल्पूलीप्रकामापरजरित्रिं।। ६।। पूर्वेद्धि
पदायभगवे०।। ७० ।।हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृत
सद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत पूर्वेद्धि
पदायांतरिक्षाय०८ इतिपूर्वेअपदक्षिणस्मं।। अग्निस्तिग्मेनवह्निंचपूर्संपूर्षेतवव्रते अग्नि
स्तिग्मेनशोचिषायासद्विश्वंन्यत्रिकमं अग्निर्नोवनतेरयिं दक्षिणेद्धिपदायअग्नयेनमअग्ने द्र०।१।

१०

पूषन्तव व्रते तव मनस्तनूषु बिभ्रतः प्रजावन्तः सचेमहि दक्षिणेऽङ्घ्रिपदाय पूष्णे नमः पूषन्निहा ॥२०॥ विव
स्वदीति मंत्रेण विनायकं पूजयेत्सुधीः विवस्वदीसरमाहग्नमद्रेमे हि पाप्मः पूर्वीछ्वंसधर्कैः। अयमग्निं नयस्व
पद्य स्पराणा अछ्वावं प्रथमाजीनतीगायनरा दक्षिणेऽङ्घ्रिपदाय वितथ्या ॥ पृनमेवितथ्य ३॥ अयमग्निर्गृ
हपतिर्गृहस्पते मंत्रं प्रपूजयेत् ॥ अयमग्निर्गृहपतिर्गार्हपत्यः प्रजा.या वसुवित्तमः अग्ने गृहपतेऽभि द्युम्न
मभि सह आयच्छस्व ॥ दक्षिणेऽङ्घ्रिपदाय गृहस्पत्याय नमः ०।४॥ यमाय त्वा यमं चैव गंधर्वगं
धद्वारिका ॥ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे। देवस्त्वा सविता मध्वानक्तु पृथिव्याः संस्पृशस्
हि अर्चिरसि शोचिरसि तपोसि दक्षिणेऽङ्घ्रिपदाय यमाय नमः ०५० गंधद्वारां दुराधर्षां नित्यपुष्टां करीषि
णीं ईश्वरीं सर्वभूतानां तामिद दक्षिणेऽङ्घ्रिपदाय गंधर्वाय ०।६। नागेन्द्रेति मंत्रेण नागराजं प्रपूजये
त्। अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यंतरिक्षं दृंह ॥ ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रा
तृव्यस्य वधाय दक्षिणेऽङ्घ्रिपदाय नागराजाय ।७। भगप्रणेतर्मंत्रेण भगं तत्र प्रपूजयेत् ॥ भगप्रणेतर्भ
ग सत्यराधो भगेमां धियमुदवा ददन्नः। भगप्रणो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम। दक्षि

२१

तो द्विपदाय मं गाप०।८। इति दक्षिणे अथ पश्चिमायां पितृभ्यः पितरः पृ ज्याद्यारि कश्चापिवारुणं पितृभ्यः स्वधा पिभ्यः स्वधानमः पितामहेभ्यः स्वधा पिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधापिभ्यः स्वधानमः अत्रपितरोमीमदंत पितरो तीतृप्यंतः पितरः पितरः शुंधध्वं। पश्चिमे द्विपदेभ्यः पितृभ्यो नमः पितरः ०। १०। वरुणस्योत्तंभनमसि वरुणस्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥ पश्चिमे द्विपदाय दौवारिकाय०। २० सुग्रीवश्च सुग्रीवश्चैव पर्णोसि पुष्पदंत श्री श्च मे सुयर्णोसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं च क्षुर्बृहद्रथंतरे पक्षे स्तोम आत्मा छंदांस्यंगानि यजूंषि नाम साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः सुपर्णोसि गरुत्मान् दिवं गच्छ स्वः पत ॥ प श्चिमे द्विपदाय सुग्रीवायनमः॥ ३॥०। श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण पश्चिमे द्विपदाय पुष्पदंताय०॥ ४॥ वरुणो वरुण मंत्रोदहं हि स्वासुरस्य पा वरुणस्योत्तंभनमसि वरुणस्कंभसर्जनीस्था वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥५॥ पश्चिमे द्विपदाय वरुणाय०। उदुत्तमं वरुण

देवि पृथिवी स्वस्तये आसुरी माया स्वधया कृतासि जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अ
स्मिन् पश्चिमे द्विपदायासुराय०॥ ६॥ सुसंदृशेति मंत्रेण शोधं च परिपूजयेत्। सुसंदृशं त्वा वयं मघवन्
वन्दिषीमहि॥ प्रनूनं पूर्णवंधुरस्तुतो यासि वशां अनु योजान्विंद्र ते हरी मपश्चिमे द्विपदाय शोभाय०॥
प्रतिपदसीति मंत्रेण पापयक्ष्माणं मर्द्दयेत्॥ प्रतिपदसि प्रतिपदे त्वानुपदे त्वा संपदसि संपदे त्वा ते
जोसि तेजसे त्वा। पश्चिमे द्विपदाय पापयक्ष्मणे नमः पापयक्ष्मन्निहागच्छ इह तिष्ठ ॥८॥ इति पश्चिमे॥
अपो त्वरस्यां पुंजति रोगमुखो सोनागानंतो नयत्परः पुंजंति व्रध्नमरुषं चरंतं परितस्थुषः रोचंते रोच
ना दिवि॥ उत्तरे द्विपदाय नागाय०॥१॥ उक्षा समुद्रं उक्षा च मल्लालो भद्रकर्णकः॥ उक्षा समु
द्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुराविवेश। मध्ये दिवो राम निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यंतौ उ
त्तरे द्विपदाय उक्षाणे नमः उक्षन्निहागच०॥३॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः। उत्तरे द्विपदाय मल्लालाय॥ ४॥ सोम
रोगाय नमः॥१॥ अनंतो नयत्परो नातर आरद्धर्मेदूषं एव स्तुदुः शाखा सोमसौरियुः ३॥

१२

मन्त्रः सुमंत्रेण सोमं चैव प्रपूजयेत् ॥ सोममभ्यो अधि वर्चो दसाहं हंसः शुचिषत् ऋतेन सत्यमिंद्रि
यं विपानं शुक्रमंधस इंद्रस्येंद्रियमिदं पयोमृतं मधु ॥ उत्तरे द्विपदाय सोमाय ॥ ५॥ याश्च वरे उग्र
श्चैव आदित्ये स्कंदनं दितिं याश्च यातुधानानां ये वा वनस्पतीरनु ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः
उत्तरे द्विपदाय उरगाय ।६।०॥ आदित्ये स्कंदन० ~~उत्तरे द्विपदे स्कंदनाय~~ ॥७॥ आदित्ये स्कंदनमसि वि
श्वो स्तक्ष्योस्कूर्णो म्रदसं त्वा स्तृणामि स्वासंस्थां देवेभ्यो भुवनपतये स्वाहा भूतानां पतये स्वाहा उत्तरे
द्विपदे दितये ॥७॥ आदितिमंत्रेण दितिं च परिपूजयेत् ॥०॥ अदितिद्यौरदितिरंतरिक्षमदितिर्माता
स पिता स पुत्रः विश्वे देवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वं उत्तरे द्विपदे अदितये नमः
अदिते इहागच्छ इह तिष्ठ ।८। इत्युत्तरे । ब्रह्मणि मेति मंत्रेण पूजयेद् ब्रह्मणस्पतिं ।मर्माणि ते चर्मणा छा
दयामि सोमस्त्वा राजामृतेनानु वस्तां उरोर्वरीयो वरुणस्ते कृणोतु जयंतं त्वानु देवा मदंतु ॥ मध्ये
ष ष्ठ्या दाय ब्रह्मणे नमो ब्रह्मन्निहागच्छ इह तिष्ठ ॥ इति मध्ये ॥९॥ अर्यमार्यमाणं चैव तत यो मे वस्व

तंतत्पया अर्यमाणं बृहस्पतिमिंद्रं दानायचोदयवाचं विष्णुं सविताचं वजिनं स्वाहा पूर्वे त्रिपदा
यै नमो पमन्त्र अर्यमन्निह गच्छेह तिष्ठ ।२०॥ व्रीहयश्च मे जवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे मष
लाश्च मे प्रियंगवश्च मे श्यामकाश्च मे गोधूमाश्च मे मसूराश्चं यज्ञेन कल्पतां ॥२१॥ याम्ये त्रिपदा पवै
वस्वताय नमो वैवस्वत इहागच्छेह तिष्ठ ।३। मित्रावरुणेति मे वस्त मही द्यौः पृथिवी धरः मित्राव
रुणो भग मित्रः सर्वं सजूः पृथिवी महिं च ज्योतिपासह मुजातं जातवेदसमयक्ष्मा यत्वा सर्वं सजा
मि प्रजाभ्यः पश्चिमे मैत्राय नमो मैत्र इहागच्छेह तिष्ठ ॥२४॥ माही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां
पिपृतां नो भरीमभिः उत्तरे त्रिपदाय पृथिवीधराय नमः पृथ्वीधर इहा ०५॥ आपो यवत्स ईशा
ने आपो अस्मान् सविता सविता तत्पया ॥ आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनंतु विश्वं हि ह
रिमं वहंति देवीरुदिराभ्यः शुचिरापूत एमि दीक्षा तपसो तनूरसि तां त्वा शिवां शग्मां परिदधे भर
द्रं वर्णं पुष्यं महीनां पयोसि वर्चोदा असि वर्चो मे देहि वृत्तस्यासि कनीनिकश्चक्षुर्दा असि चक्षु
र्मे देहि ॥ ईशाने एकपदाय आपो पवत्साय नमः ।०।२६।०। सविता त्वा सवानां सुवतामग्नि

१३

ग्निर्गृहपतीनांꣳ सोमो वनस्पतीनाम् बृहस्पतिर्वाचीइंद्रो ज्येष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो ध
र्मपतीनां ॥ आग्नेय्यां सवित्रे नमः सवितृ ॥७॥ जनस्य गोपा मंत्रेण जयंतं प्रपूजयेत् जनस्य गोपा अ
जनिष्ट जागृविरग्निः सुदक्षः सविताय नव्यसे घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शु
चिः नैरृत्ये एकपदाय अजयाय नमः ॥८॥ नमस्ते रुद्र मंत्रेण रुद्रं चैव प्रपूजयेत् नमस्ते रुद्र मन्यव उतो
त इषवे नमः बाहुभ्यामुत ते नमः ॥ वायव्ये रुद्राय नमः रु० ॥९॥ या ते रुद्रेति मंत्रेण रुद्रकामं प्रपू
जयेत् ॥ या ते रुद्र शिवा तनूरघोरापापकाशिनी तया नस्तन्वा शंतमया गिरिशंताभिचाकशीहि
॥ ॥ रुद्रकामाय नमो रुद्रकाम० ॥१०॥ ते आचरंती चरकाविद्याचैव विदारिका ते आचरंती समने
व योषा माते व पुत्रं बिभृतामुपस्थे अप शत्रून्विध्यतांꣳ संविदाने आर्त्नी इमे विस्फुरंती अमित्रा
न् ॥ ॥ चरकायै नमः ० ॥ १२ ॥ पूतनापुरुद इमंति पापकानपापरापसी पुरुदस्यो विश्वरूपइंदुरं
तर्महिमानमानंज धीरएकपदी द्विपदी त्रिपदी चतुष्पदी अष्टपदा जनं यान्कंतं तेन श्रीवास्तुदेवाः
प्रीयंतां ॥१५॥ इति चतुःषष्टिवास्तुदेवपूजनम्। अथ गोर्यदि शोदुष्णमातृकापूजनं। अथ मातृ

पूजान्तिमित्तमाह—अकृत्वा मातृकायागं वैदिकं तु समारभेत्। तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मा-
तरः। मातृकापूजाचक्रमत्र प्रदेस्थाप्याः। पंचोर्ध्वं पंचतिर्यक् च रेखाः कार्याः प्रयत्नतः। कोष्ठषो-
डशके पूज्या मातरश्च पृथग्विधाः गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वा-
हा मातरो लोकमातरः। धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह गणेशेनाधिका ह्येता वृद्धौ पूज्या-
श्च मातरः; इति षोडश नामानि॥ तत्रायं क्रमः मातृवायव्यदिग्भागे गणेशं तु समर्चयेत्। त-
त ईशानदिग्भागे कुलदेवीं प्रपूजयेत्॥ गौरी च नैर्ऋते पूज्याः पद्मा पावकदिग्गता शची च याम्यदि-
मे स्थाप्या मेधा चैव द्वितीयके। सावित्री दक्षिणे पूज्या विजया च द्वितीयके। जया च उत्तरे स्थाप्या
देवसेना द्वितीयके। स्वाहाग्नेय्यां तथा पूज्या स्वधा चैवेशकोष्ठके पूर्वस्मिन्मातरो लोकमातरः
श्च द्वितीयके धृतिः पुष्टिश्च वायव्ये तुष्टिं नैर्ऋत्यवोत्तथा कुलदेवी गणेशश्च गौरी पद्मा समन्वि-
ता। एता वै मध्यकोष्ठे च पूज्या वै वा घमंडले॥ अथासां स्थापनं॥ गजवक्त्र गणाध्यक्ष सर्वविघ्नवि-
नाशन। अस्मिन्पत्रे समागच्छ लंबोदर नमोस्तु ते गणानां त्वेति मंत्रेण नाप्यं प्रपूजयेत्॥ ग

१५

णानां त्वी॰ गौरीदेवि समागच्छ वरदा भव वरदा भव शूलधृक् कुलांबिके वृषारूढे शांतिं कुरु मम माध्व-
रे शर्मासीति हि मंत्रेण मंडले त्वं समाविश शर्मास्यवधूतं रक्षोवधूता अरात-
यो दित्यास्त्वगसि त्वादितिर्वेत्तु धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु दिवस्कंभनीरसि धिषणा-
सि पार्वतेयी प्रति त्वा पर्वती वेत्तु गौरी ई ह न॰ ॥ २ ॥ पद्मे त्वं पद्महस्तासि पद्मनाभस्य च प्रिया पद्मा-
करस्य दुहिते एहि सौम्ये शुभं कुरु ॥ पावकाल श्च मंत्रेण मंडले त्वं समाविश पावका नः सरस्वती वा-
जेभिर्वाजिनीवती यज्ञं वष्टु धियावसुः चोदयित्री सूनृतानां । यज्ञं दधे सरस्वती महो ऽ अर्णः सर-
स्वती प्रचेतयति केतुना धियो विश्वा विराजति । पराशरस्य दुहिते वज्रहस्ते भिगामिनि शचि दे-
व्येहि नो यागे दुष्टारिं मथ्य निवेशनेति मंत्रेण मंडले त्वं समाविश निवेशनः संगमो वसूनां विश्वा
रूपाभि चष्टे शचीभिः देव इव सविता सत्यधर्मेंद्रो न तस्थौ समरे पथीनां शचि इहागच्छ हृ॰ ।३।
मेधे हंसगतासि त्वं चित्स्वरूपा हृदि स्थिता आधाराद्यो नमस्तुभ्यमेहि देवि जगद्धिते । मेधां म इ-
ति मंत्रेण मंड मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः मेधामिंद्रश्च वायुश्च मेधां धाता

१५

दधातु मे स्वाहा ॥ मेधे इहा० ॥ ४ ॥ सावित्रि सवितृत्तेजा ब्रह्मा च्युतपुरोगमा ॥ शिवे सौम्ये शुभे देहि सर्व
सिद्धिप्रदा भव । सवित्रो त्वेति मंत्रेण मंडले त्वं समाविश सवितारं मध्य मे हं नाग्नि र्द्वितीये वायु स्तृतीय
आदित्य श्चतुर्थे पंचम ऋतुः षष्ठे मरुतां त्वं सप्तमे बृहस्पतिरष्टमे मित्रो नवरुणो दश मर्द्दे द्रुएकाद
शे विश्वेदेवा द्वादशे ॥ सावित्रि इ० ॥ ५ ॥ विजये विश्वात्मा विश्वात्मा विश्वतो मुखी महादंष्ट्रे महाका
ये समागच्छ मम ध्वरे प्राणाय स्वाहा मंत्रेण मंडले त्वं समाविश ॥ प्राणाय स्वाहा पानाय स्वाहा व्याना
य स्वाहा अंबे अंबिके अंबालिके न मा नयति कश्चन कः सुभद्रिकां पीलवासिनी विजये इहा० ॥ ध्वा
य मध्वरे त्रेण मंडले त्वं स इहा ० ॥ ६ ॥ जयदेवि समागच्छ जयदे हिं हवा द्रिनी वज्रासि च क्रै गदपारियुं
नाशये ध्वरे वज्री नाम इति मं माविश वज्रीपिता वज्ररस्य पुत्रश्चारुणो ती समनावगत्य इषुधि सं
काः पृतनाश्च सर्वाः पृष्ठे नि नधो जयतीं प्रसूतः जयदेवि इ० देवसेने समागच्छ देवतानां पुरो गमे
देवाधिदेवी त्वं प्रोक्ता निहं सि पुम ध्वरे इंद्रश्रासन्न मंत्रेण मंडले त्वं समाविश इंद्रश्रासत्लेना
बृहस्पति दक्षिणा यत्तपुरं तु सोम देवसेना नाम भिसंजती नां जयंती नां मरुतो यंत्वग्रं देवसे

२५
15

नेइत्यहा ०।।८ स्वधा पितृमनुष्याणामेकात्वं च गुणात्मिका। कारणं ह्यसि सर्वेषामेहि देवि ममाध्वरे
पितृभ्य इति मंत्रेण स्वधां तत्र प्रपूजयेत् पितृभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः
स्वधा नमः अक्षन्नपितरोमदन्त पितरस्तीतृपन्त पितरः शुन्धध्वं स्वधेद्र ०।।९।। स्वाहे सुलक्ष्
५ णे नित्यं देहि यत्ताभिवाञ्छितं त्वमागच्छाध्वरे देवेशे समंत्राधितते द्विजैः स्वाहा प्राणेति मंत्रेण स्वाहां
तत्र प्रपूजयेत् स्वाहा प्राणेभ्यः साधिपतिकेभ्यः पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा दिवे
स्वाहा दिवे स्वाहा सूर्याय स्वाहा इत्यहाः १० सर्वेषां जगतां मातः शब्दब्रह्ममयी शुभा ध्यानम्
त्रि परापारा मातः एवाहयाम्यहं आवाहयेल्लोकमातृ रधिकान्ते स्वरांबराः चराचरस्य जननी
यैते विघ्नहरी शुभा लोकं प्रणेति मंत्रेण लोकमातृः प्रपूजयेत्।। लोकं प्रणविंदं प्रणणपोसी
धकवा त्वां इन्द्राग्निन्वा बृहस्पतिरस्मिन्योनवसी स्वदन लोकमातरहागच्छन्तु इह तिष्ठन्तु धनेसंतोषयुक्ता
सिसोम्याधृंद्रसमोदित्ता सासम्यफलदासि त्वं विपरीतामयावहा बसीस्वदन् अनाध इति मंत्रेण ध
तिं तत्र प्रपूजयेत् अनाधृष्टा पुरस्तादग्नेराधिपत्य आयुर्मे दाः पुत्रवती दक्षिणत इंद्रस्याधिपत्ये

रयित्वा स्वपादोपरि स्वुदकां क्षिपेत् अर्घ्यैः विराजोदोसीति॰ प्रजापतिः ब्रह्मा देवता पादप्रक्षा-
लने॰ ॥ ॐ विराजो दोहोसि विराजो दोहमशीयमपिराजोदोहः इति दक्षिणपादं प्रक्षाल्य पुनर्वामं
प्रक्षालयति पुनरर्घं द्वितीयं विष्टरं पूर्ववदासने दद्यात् अर्घ्यां २ प्रति॰ ऋषिः ॐ आपस्थ इति: प्र
जापति ब्रह्मा॰ देवता अनुष्टुप् छंदः अर्घ्यग्रहणे विनियोगः ॐ आपास्थयुष्माभिः सर्वान्कामा
नवाप्नवानीति मूर्द्धपर्यंतमानीय ॐ समुद्रमिति अपवर्गेण: आपो: गायत्री॰ अर्घाभिमंत्रणे॰
॥ ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत ॥ अरिष्टास्माकं वीरामा परामा परासेचि मत्पयः
इति मूर्ध्नो क्षिपेत् आचमनीयं २ प्रति॰ ॐ आमागन्नेति॰ प्रजापतिः॰ आपो॰ त्रिष्टुप्॰ आच
मने॰ ॐ आमागन्यशसा सं सृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं त
नूनां इति सकृदाचम्यास्माज्जेचमनं करोति ॐ मधुपर्को २ प्रति॰ यजमानहस्तस्थितं मधुप
- मित्रस्य त्वेति प्रतीक्ष्य ॐ मित्रस्य त्वेति॰ कुत्स ऋषिः सूर्यो॰ त्रिष्टुप्॰ मधुपर्कावेक्षणे॰ वि॰
ॐ मित्रस्यत्वा चक्षुषा प्रतीक्षेति प्रतीक्ष्य ॐ देवस्यत्वेति॰ बृहस्पतिरांगिरसः॰ सविता॰ त्रि

ऋषु. मधुपर्कग्रहणे०॥ ॐ देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यां इत्यंजलि
नाप्रगृह्य सव्ये पाणौ निधाय दक्षिणपाणेरूपकनिष्ठयाङ्गुल्या ॐ नमः स्यावास्यायान्नशनेय
त्त आविद्धं तत्ते निष्कृन्तामिति सकृदालोड्य तूष्णीं सकृदनामिकाङ्गुष्ठाभ्यामादाय बहिर्निक्षिप्य
पुनरेवं द्विवारमालोडनं निरूक्षणं च करोति ॐ यन्मधुन इति. कुत्स० मधुपर्कोदेव. जगती
छंदो मधुपर्कप्राशने विनियोग ॐ यन्मधुनोमधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनोमध
व्येन परमेण रूपेणान्नाद्येन परमोमधव्योमादोसानीति अनामिकाङ्गुष्ठाभ्यामादाय त्रिः
प्राश्नाति इति मधुपर्कोजं सर्वे ऋत्विग्भ्यो दद्यात् यथा चतुर्मुखो ब्रह्मा सर्ववेदधरोमुवि त
था त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम। ब्रह्माणं रक्तवर्णाभं रक्तवस्त्रैरलंकृतं चतुर्भुजं
चतुर्वक्त्रं सश्रुचिहस्तकं ॐ ममाग्ने इति मंत्रेण ब्रह्माणं प्रणमाम्यहं ओं मिमर्माणि ते वर्मणा छा
दयामि सोमस्त्वाराजामृतेनानुवस्ताम् उरोर्वरीयो वरुणस्ते कृणोतु जयंत्वानु देवा मदं

तु अस्य कर्मणः कृताकृतावेक्षकत्वेन त्वं ब्रह्मा भव ॐ अद्य अमुकगो० अ० प्र० वेदांतर्ग
त शा० अ० शर्माणम् अस्मिन् कर्मणि आचार्यत्वेनाहं वृणे, वृतोऽस्मीति प्र० वृतेन दीक्षेति पाठः
आवाहयिष्ये आचार्यं सत्यशौचपरं तं सदा वेदवेदांगशास्त्रज्ञं लोभमोहविवर्जितं बृहस्पति
र्यथा स्वर्गे ज्ञानविज्ञानसंयुतः तथैव मम यज्ञेऽस्मिन्नाचार्यस्त्वं भव प्रभो बृहस्पतेः सुमं
त्रेण आचार्यं प्रणमाम्यहं ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् अस्य कर्मणः प्रतिष्ठापनार्थं त्व
माचार्यो भव अहं भवामीति प्रतिवचनं ॐ अद्य अ० गो० अ० प्र० अ० वे० शा० अमुकं ऋग्वे
दित्वेन त्वामहं वृणे वृतोः ॥ वृतेन ॐ आवाहयत्र ऋषीन्सान्ये पूर्वस्यां दिशि संस्थिताः
मार्कण्डेयो भरद्वाजः काश्यपेयस्तु नारदः पुलस्त्यः पुलहश्चैव दत्तात्रेयश्च भार्गवः अ
स्य यज्ञस्य सिद्ध्यर्थं मत्ते ऋग्वेदपाठकाः ऋग्वेदं वपुषा श्वेतं शुभ्रवस्त्रैरलंकृतं श्वेताभ

रणसंयुक्तं कांचनेनविभूषितं अग्निमीले सुमंत्रेण ऋग्वेदं प्रणमाम्यहं अग्निमीले पुरोहितं य
ज्ञस्य देवमृत्विजं होतारं रत्नधातमं अग्निः पूर्वेभिरृषिभिरीड्यो नूतनैरुत स देवाँ एह वक्षति
अग्निना रयिमश्नवत्पोषमेव दिवेदिवे यशसं वीरवत्तमं ऋग्वेद पद्मपत्राक्षो गायत्रः सोमदैवतः
अत्रिगोत्रस्तु विप्रेंद्र ऋत्विक् त्वं मे मखे भव अहं ॥ ऊँ अद्या० गो० अ० प्रा० अ० वे शा० धा० अ०
शु० यजुर्वेद त्वेनाहं वृणे ब्रतोस्मीति प्र० ब्रतेन दीक्षामिति पा० आवाहय ऋपर्णीस्तान्ये दक्षिणां दिशा
माश्रिताः अगस्त्यो आसवाल्मीकौ गौतमो गर्गसंज्ञकः मांडव्यो न्योद धीश्च गालवश्चतपा ष्ट
मः यजमानस्य यज्ञेस्मिन् मयोक्ता ननिर्मलाः रक्ताभरणसंयुक्तं रक्तकुंडलशोभितं ईषेत्वोरि
ति मंत्रेण यजुरावाहयाम्यहं ओं ईषेत्वोर्जेत्वा वायवस्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमाय क
र्मण आप्यायध्वमघ्न्या इंद्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघश
ंसो ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि क्रातरास्तो यजुर्वेद स्त्रे ष्टभो

ब्रह्मदैवतः भारद्वाजः मुविप्रेंद्र ऋत्विक् त्वं मेमखे भव अहं भ. प्रति. अद्या० गो. अ. प्र. अवे.
शु. अ. श. सामवेदत्वेन त्वामहं वृणे व्रतोस्मी ति. व्रतेनदी. आवाहय ऋषींस्तान्ये पश्चिमां दिश
माश्रिताः वशिष्ठश्चैव दुर्वासा जमदग्निः पराशरः विश्वामित्र ऋषिर्भृग आत्रेयश्चाङ्गिरष्टमः
यजमानस्य यज्ञेस्मिन्सामगानेसमुद्यताः सामवेदं श्यामवर्णं स्यामसवस्त्रैरलंकृतं गीतध्वनिसमायु
क्तं वीणाहस्तं विचिंतये आत्तू नः साममंत्रेण साम आवाहयाम्यहं आत्तन रंद्र हत्रहन्नस्माकम
र्द्धमागहि महान्महीभिरूतिभिः सामवेदस्तु पिंगाक्षो जगत्यो विष्णुदैवतः काश्यपगोत्रो विप्रेंद्र
ऋत्विक् त्वं मेमखे भव अहं भवामि ३ अद्यामु. गो. अ. प्र. अ. शु. अस्मिन्कर्मणि अथर्ववे
दत्वेन त्वामहं वृणे व्रतोस्मा. प्रतिवचनं व्रते. दीपाठः आवाहय ऋषीस्तान्ये कौवेर्यां दिशि सं
स्थिताः ऋतुर्दक्षो मरीचिश्च पात्तवन्क्यो महातपाः शौनको यस्तु मजी वामदेवस्तथा गिराः य
जमानस्य यज्ञेस्मिन्नथर्वशिरसा सह अथर्ववेदं कृष्णाभं वेष्टितं नीलवाससा नीलाकां

सं महारौद्रं चिंतयेच्छुतमानसं करालं त्रिशिखं धृत्वा दुःप्रेक्ष्य शिखिरं धनुः अतिरौद्रं ततो ध्यात्वा
रौद्रं च तस्य रक्ष ध्यं शन्नो देवीति मंत्रेण पूर्णं आवाहयाम्यहं ॐ शन्नो देवीरभिष्टय आपो भवन्तु पी
तये शंयोरभिस्रवंतु नः इहन्ने आथर्ववेदोऽनुष्टुप् छंद वरुण देवता वैखानसगोत्र विप्रेंद्र ऋत्विक्
त्वं मम खे भव अहं भवामीति प्रति· इति ऋत्विजां वरणं एतद् ऋणं प्रतिष्ठासि ध्यर्थं कुंडलस्थ
द्रिकावासां सितं त्रसाम्नायेद्दमं वायव्या यथा विभांगं संपद्यतां स्वपाद प्रक्षालनं अर्घ्यं विसर्जेद् दधि
वं दनं दधिक्राव्णो अकारिषं जिष्णुरश्वस्य वाजिनः सुराभिनो मुखाकृत प्राण आयुः शतारिष त्
कोऽसि कोऽसि त्वमरोहं तीपुरुषः पुरुषस्य रि अवनो दूर्वी प्रतिनौशी सहस्रेण शतेन च दूर्वा मार्जनं अप
मृत्तिकाः· अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे मृत्तिके हर मे पापं यन्मया दुः कृतं कृतं अप
यजमान हृतिरक्षां वं धनं तत्र यवा कुशांस्तथा दूर्वान्सर्वयान गंधसंयुतान् गोमयं दधि संयुक्तं का
रयेत्ताम्रभाजने तन्द्राजनं करपु ध्यात्वा महिजः मंत्रा पठेत् ततः ॐ गणाधिपं नमस्तिजः मस्तत्पनम

ग्निं कुर्यात्स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यस्थाल्योत्पूय अवेक्ष्य प्रोक्षणीश्च पू
र्वेत्तदुपयमन कुशानादाय समिधोभ्याधाय पर्युक्ष्य जु ॐ पादेष एव विधिश्चिद्धोमः इति सूत्रं तद्वि
वरणं यथा अथाचार्यः सुवस्नातः सुप्रक्षालितपाणिपादः स्वपवीतः कर्मस्थानमागत्य वरणा
दियत्तदृष्टोऽन्दवासवोत्रीन कुशान्प्रागग्रानुदगग्रान्धत्वात्त्रोपविश्य ब्रह्ममो वेदिकादिषु परिस
मूहनादिकं कर्म कुर्यात् तद्यथा परिसमुह्य त्रिभिर्दर्भैः पांसून् यसायं उपलिप्य गोमयोदका
भ्यां उल्लिख्य स्रुवेण उल्लिख्य प्रागग्रा उदक संस्थाः स्थण्डिलपरिमाणास्तिस्रो रेखाः कृत्वा
उद्धृत्य अनामिकांगुष्ठाभ्यां यथालिखिताभ्योरेखाभ्यः पांसून् उद्धृत्य अभ्युक्ष्य कुशोदकेनाभ्यु
क्ष्य अग्निमुपसमाधाय ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे देवाँ आसादयानितीहइति
मंत्रेण अग्निं पूजयित्वा दक्षिणतो ब्रह्मासनमास्तीर्य यत्ति यद्वृक्षोद्भवं पीठं निधाय तत्र ब्रह्माणं स्था
पयित्वा प्रणीयत यथा अग्नेरुत्तरतः कुशेष्वासनद्वयं कल्पयित्वा तत्रच मसं सव्यहस्ते कृत्वा द
क्षिणहस्तेनोद्धृत्य पात्रांतरस्थोदकेन पूरयित्वा पश्चिमासने निधायालम्भपूर्वीसने स्थापयित्वा

२९
29

परिस्तीर्य बर्हिर्मुष्टिमादाय ईशानतआरभ्य उदकान्तं अग्नेः परिस्तरणं कृत्वा अर्पवदासाद्य
अर्पवंति वस्तून्यासाद्य द्वंद्वं प्रागग्रामुदगग्रं वा अग्नेरुत्तरतः पश्चाद्वा आसाद्य तद्यथा पवित्र
च्छेदनानि त्रीणि कुशतरुणानि पवित्रे द्वे साग्रे प्रोक्षणीपात्रं आज्यस्थाली संमार्गकुशाः उ
पयमनकुशास्त्रिप्रभृतयः समिधस्तिस्रः पालाश्यः स्रुवः खादिरो हस्तमात्रिभिः कुशतरुणैः
यतः प्रादेशमात्रं विहाय कुशतरुणे प्रतिच्छिद्य प्रोक्षणीः संस्कृत्य प्रोक्षणीपात्रं विहाय कुश
तरुणे प्रतिच्छिद्य प्रोक्षणीः संस्कृत्य प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्रपात्रं तरेण ह
स्तेन प्रणीतोदकमासिच्य अर्पवत्प्रोक्ष्य अर्पवंति प्रयोजवंति वस्तूनि प्रोक्ष्य प्रोक्षणीपात्रं त
त्रैव निधाय निरूप्य आज्यं आज्यस्थाल्यामाज्यनिर्वापः चरुस्थाल्यां चरुनिर्वापः अधिश्रित्य आ
ज्यं ब्रह्माधिश्रयति चरुमधिश्रित्य युगपत् अग्नावारोप्य पर्यग्निकुर्यात् ज्वलदुल्मुकमाज्य
चर्वोः समन्ताद्भ्रामयेत् श्रुवं प्रतप्य प्रांचं मध्यमुखं स्रुवं तापयित्वा संमृज्य संमार्गकुशैः सं
मृज्य मूलतोग्रपर्यन्तेन त्वाग्रेरग्रं मूलैर्मूलं मध्यैर्मध्यमिति अभ्युक्ष्य प्रणीतोदकेन स्रुवं प्रोक्ष

णं कृत्वा पुनः प्रत्यक् पुनः स्रुवं तापयित्वा विदध्यात् दक्षिणतो निदध्यात् दक्षिणतो निदध्यात् आ-
ज्यमुद्वास्य आज्यमुत्पाप्येचरोः पूर्वेण नीत्वाग्नेरुत्तरतः स्थापयित्वा आज्यमग्नेः पश्चादानीय
चरुं चानीय आज्यस्योत्तरतो निधाय एवं त्रिचतुरादीन्यन्यानि हवींषि उद्वासयेत् अधिश्रिता-
नां पूर्वेणोद्वासितानां तु पश्चिमतो हवींषि उद्वास्यानयनमिति याज्ञिकसंप्रदायात् उत्पूर्वं पवि-
त्राभ्यामुत्पवनं कृत्वा अवेक्ष्य अपद्रव्याणि निरस्य प्रोक्षणीपूर्ववत् पूर्ववत्तु एषजलं कुर्यात् उ-
पायमनकुशानादाय पर्युक्ष्य जुहुयात् येणुदकेन सपवित्रेण दक्षिणचुलुकं गृहीतेन ई-
शानादि उदक्पर्यंतमग्निं परिसिच्यति जुहुयात् होमशेषः संस्रवं तस्य धारणं प्रणीतासु त-
त्रैव पवित्रमोकः एष एव विधिर्यत्र क्वचिद्धोमः न मंत्राः इति कुशंडिकाविधिः अथ प्रसंगात् स्रु-
क्स्रुवग्रहणविधिर्लिख्यते स्रुक्स्रुवमंगुलषट्कं ग्रिस्ततोव स्नाषडंगुले षडंगुलमयो विस्तृर्द्र स्त-
स्मात् षडंगुले षडंगुलेवसेधायुर्यमस्तस्मात् षडंगुले इंद्रमाद्योर्ध्वे तेदंडे दुःखं शोकं प्र-
जायते एमभागपतेदंडे मत्पुरे नतसंशयः विष्णुस्थानं प्रगृह्य याज्जुहुयाच्चममा हि तः

संभ्रवधारणं आधारावाज्यभागौ च प्रजुहुयात् जातवेदसि प्रोक्षणं तन्नदानं तं संस्रवं तु कदाचन
न संस्रवं ब्राह्मणो दद्यात् प्रोक्षणं तान दुर्बलः पतित्वा रौरवे घोरे जको जायते ध्रुवं आचार्यस्य करलाद स्विं
ष्टं विधिवन्नस्पृशेत् प्रतिमंत्रं जुहोत्येवं पालदेताश्च तुर्दश अथ होमाहुतयः आन्वारब्ध आघार
वाज्यभागौ महीपाहृतयः सर्वप्रायश्चित्तं स्विष्टश्चैतन्नित्यं सर्वत्र वाश्रुहा माहृतिभ्यः स्विष्टकृ
दन्यश्चैवहाज्याहुतिः दक्षिणे जान्वाध्य ब्रह्मणान्वारब्धः ॐ नमः प्रजापतये स्वाहा इति त्यागं कृत्वा शेषं पा
त्रांतरे प्रक्षिपेत् इदं प्रजापतये ॐ इंद्राय स्वाहा आग्नेः दक्षिणे देशे उत्तरार्द्धे प्रांशं दत्वा इदमग्नये इति
त्यागः ॐ सोमाय स्वाहा इत्यग्ने उत्तरपूर्वार्द्धे आग्नेय्यामाज्यभागं कृत्वा इदमग्नये इति त्यागः ॐ सो
माय स्वाहा इति दक्षिणपूर्वार्द्धे सौम्यमाज्यभागं कृत्वा इदं सोमायेति त्यागः प्रजापतये स्वाहेत्याद्याश्च त
स्रा आहुतीर्दत्वा पश्चात्कलशस्थापनं तदनंतरं गणेशप्रतिष्ठा ततो नवग्रहादि दशाहुतयः तदनंतरं
माज्येन मुखं दद्युत्ति पूर्णित्वा न्यासं कृत्वा हरस्यतनुसंभूते त्यादिना आवाहनक्रमः अथ कलशस्था
पनं तत्रादौ कलशोत्पत्तिः अथातः संप्रवक्ष्यामि कलशस्य भवो यथा उत्तरे हिमवत्पार्श्वे पश्ची

रोदो नाम सागरः प्रारब्धं मंथनं तत्र देवैः सवासवैः दानवैर्दितिपुत्रैश्च बलिना परिरक्षितैः मंथानं
तत्र कृत्वैः मंदिरं कृत्वा तु वासुकिं अधः कूर्मं च संस्थाप्य विलोडीऽच मंदरे एकतो देवताः सर्वाः सदै
त्यो बलिरेकतः मथ्यमाने तदा तस्मिन् क्षीरोदे देवदानवैः उत्पन्नानि च रत्नानि यानि नाना कदाचन
विमानं पुष्पकं पूर्वं मुत्पन्नं हंसवाहनं नागरो ऐरावतश्चैव पादपः परिजातकः काः वीणावादि
त्रकं चैव सुरं भानन्त्य गुणान्विता लक्ष्मीः सुशीला रूपा सुमनाः सुशीला सुरभिस्तथा कौस्तुभं मणि
रत्नं च बालचंद्रो विषं तथा उच्चैःश्रवाः समुत्पन्नः कामधुक् कुंडलं तथा अमृतं तिः स्तंतत्र भा
जने न विना तदा स्पृष्टो हि कलशः कामरूपिणा विश्वकर्मणा कलया सर्वदेवानां गंधर्वाणां सवास
वैः निर्मितोयं पुरा देवैः कलशास्तेन कथ्यते कलशस्य मुखे ब्रह्मा ग्रीवायां वृषभध्वजः मूलेन
स्य स्थितो विष्णुः मध्ये मातृगणाः स्थिताः कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी अर्जुना गोमती चै
व चंद्रभागाः सरस्वती कावेरी कृष्णवेणी च नर्मदा च महानदी तापी गोदावरी चैव कालिंदी पाप
हारिणी विशुपादा प्रजापुन्या त्रिपदा च विनिर्मिता प्रभासः पुष्करं तीर्थं नेमिषं च हिमालयः व

रेश्वरस्त्रिमूर्तेश्च गंगासागरसंगमः ॥ पृथिव्यां यानि तीर्थानि कलशे संवसंति हि ॥ अत्र शांतिश्च पुष्टि
श्च गायत्री च गदाधरः ॥ ऋग्वेदश्च यजुर्वेदः सामवेदस्तथैव च ॥ अथर्ववेदसहिताः सर्वे कलशमा
श्रिताः ॥ विश्वकर्मन्समागच्छ दिवाकरसमप्रभः ॥ हस्ते कृत्वा ततः कुंभं न्यसेत्तं भूमिमंडले ॥ घटं हेमम
यं कृत्वा रौप्यं ताम्रमथापि वा ॥ निर्दोषं निर्मलं चैव पूरयेन्निर्मलैः जलैः ॥ ईशान्यां दिशि संस्थाप्य धान्यप
ल्लवैः समन्वितं ॥ सुमुहूर्ते शुभे लग्ने सुलग्ने लक्षणान्विते ॥ पुण्याहे वेदघोषेण वरुणं च प्रपूजयेत् ॥ य
त्फलं कपिलादाने स्वर्णदाने च यत्फलं समवाप्नोति श्रुत्वा कलशसंभवं ॥ ब्राह्मणो लभते विद्यां पाण्डित्यं वा
लभते लाभं युद्धे गतिमां वा सुयान् ॥ वंध्या च लभते गर्भं पुत्रमुत्तमं ॥ एतेनामृतगर्भेण निर्मितेन
कदाचन कलशेन समंत्रेण यः ॥ कुर्यादभिषेचनं त्वायुरारोग्यमैश्वर्यं लभेत्कामान्सपुष्कलान् ॥ सर्व
पापविनिर्मुक्तो कुंभभवनं व्रजेत् ॥ कुंभः सचामीकररूप्यपात्रः सुमृन्मयो वा कलशः सदायः ॥ क्षीरा
ब्धिमंथानसुराग्रजन्मा नदीतीर्थजले निवासः ॥ पुरा हि सृष्टश्च पितामहेन महोत्सवानां प्रथमो वरि
ष्ठः ॥ दूर्वाक्षतास्वस्य सुपल्लवैश्च वासोफलै रत्नसमन्वितश्च ॥ अभ्यर्च्य तं रूपायेमंत्रा ऋग्वेदादि

समुद्रवाः महापातकहंतारो निवेश्याः कुंभसंभवे इति कलशोत्पत्तिः अथ कलशस्थापनं तत्र ता
वरुणं नां त्वेति गणेशपूजनं गणानां त्वा ॥ ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवन
स्य धर्त्री पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिंसीः इति कलशाधारभूमिपूजनं ॐ अग्निमीले
पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्न इति कलश पूर्वे ऋग्वेदपूजनं इषे त्वोर्जे त्वा वायवस्थ दे
वो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा ऽअ
यक्ष्मा मा व स्तेन ईशत माघशंसो ध्रुवा ऽस्मिन् गोपतौ स्यात बह्वी र्यजमानस्य पशून् पाहि । इति दक्षिणे
यजुः पूजनं ॥ अग्न आयाहि वीतये गृणानो हव्यदातये नि होता सत्सि बर्हिषि
इति पश्चिमे सामपूजनं शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः इत्युत्तरे ऽथ
र्वणे पूजनं ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वो
रुधारा पयस्वती पुनर्मा विशताद्रयिः कलशस्थापनं ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज
नी स्थो वरुणस्य ऽऋतसदन्यसि वरुणस्य ऽऋतसदनमसि वरुणस्य ऽऋतसदनमासीद इति

जलप्रोक्षणं स्थिरो भवेति दृढीकरणं ॐ अप्स्वग्ने वो निषदनं पर्णे वो वसतिः कृता गोभाज इत्किला
सथ यत्सनवथ पूरुषं इति कालशे अश्वत्थादि पत्रधारणं तत्राश्वत्थपत्रं १ उडुंवपत्रं २ वटपत्रं ३
प्लक्षपत्रं ४ आम्रपत्रं ५ इति कलशे पंचपल्लवधारणं ॐ कांडात्कांडात्प्ररोहंती परुषःपरुषस्परि
एवा नो दूर्वे प्रतनु शतेन सहस्रेण च इति दूर्वाधारणं ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुना
म्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः इति कुशपवित्रधारणं ॐ याः फलिनी या अफला अपु
ष्पा याश्च पुष्पिणीः बृहस्पतिप्रसूतास्तानो मुंचन्त्वंहसः इति नालिकेरं वा ॐ हिरण्यगर्भः सम व
र्तताग्रे भूतस्य जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेमः इ
ति हिरण्य पंचरत्नानि च तत्र वज्रमौक्तिकवैडूर्यपुष्परागेंद्रनीलकं इति पंचरत्नानि ॐ अक्षन्नमीमदं
त ह्यव प्रिया अधूषत अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विंद्र ते हरी इति अक्षतधारणं ॐ
धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हि
रण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि इति सप्तधारणं तत्र वा गोधू

मा: २ मुद्गा: ३ तिला: ४ श्यामका: ५ तंदुला: ६ यवा: ७ इति सप्तधान्यं ॥ ॐ या ओषधी: पूर्वा जा
ता देवेभ्यस्त्रियुगम्पुरा मनै नु बभ्रूणामहं शतन्धामानि सप्त च इति सर्वौषधी धारणं तत्र कुष्ठं ॥१
जटामांसी २॥ दारुहरिद्रा ३ हरिद्रा ४ मोरहरी ५ शिलाजीत ६ वचा ७ चंदनं ८ चंपकं ९ मुस्ता ॥१० इ
ति सर्वौषधय: ॐ पंच नद्य: सरस्वतीमपि यंति सस्रोतस: सरस्वती तु पंचधा सो देशेभवत्सरित् इति न
द्युदक धारणं ॐ उपह्वरे गिरीणां संगमे च नदीनां धियो विप्रो अजायत इति नदीसंगम जलं ॐ समुद्रा
य त्वा वाताय स्वाहा शरीराय त्वा वाताय स्वाहा अनाधृष्याय त्वा वाताय स्वाहा प्रतिधृष्णाय स्वाहा ओ
वस्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा इति समुद्रोदक धारणं अश्वक्रांते इत्यम
त्तिका धारणं अश्वक्रांत इति का धारणं तत्र गजस्थान मृत्तिका १ अश्वस्था० २ रथस्था० ३ व
ल्मीकस्था० ४ नदीसंगमस्था० ५ गोस्था० ६ राजस्था० ७ नगरद्वारस्था० ८ ॥ इत्यष्टौ मृद: ॥ ॐ
यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ५ संदानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति
इति वस्त्रेणाच्छादयेत् ॐ गणानां त्वेति कलशे गणेशमावाह्य पूजयेत् इमम्मे वरुण श्रुधी ह

ब्रह्मध्याचमन्डय ॥ त्वामवस्युराचके इतिवरुणं ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा
राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा
जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो
न ओषधयः पच्यन्तां योगक्षेमो नः कल्पतां इति कलशे ब्रह्मणमावाह्य पूजयेत् ॐ इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे इति विष्णुपूजा ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः
बाहुभ्यामुत ते नमः ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत वस्नेव विक्रीणावहा इषमूर्जं श
तक्रतो इति कलशपूरणं एतं ते मनो जूतिरिति प्रतिष्ठा सर्वे समुद्राः सरितस्ती
र्थानि जलदा नदाः आयान्तु यजमानस्य दुरितक्षयकारकः एभिर्व्याप्यानितीर्थानि क
लशे तानि संतु वै इति कलशे सर्वतीर्थावाहयेत् ततो गंधादिना पूजयेत् एतेन कलश
पूजनेन कलशस्य देवाः प्रीयंतां इति कलशस्थापनं ततो म्हणादि द ॥ ०॥ श्रीराम

प्राङ्तयः ॐ भूः स्वाहा इदमग्नये ॐ भुवः स्वाहा इदं वायवे ॐ स्वः स्वाहा इदं सूर्याय ॐ त्वंनोऽ अग्ने वरुणस्य विद्वा
न् देवस्य हेडो ऽवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्नी
वरुणाभ्यां ॐ स त्वंनोऽ अग्नेवमो भवोती नेदिष्ठोऽ अस्याऽ उषसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि
मृडीकं सुहवो नऽएधि स्वाहा इदमग्नी वरुणाभ्यां ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽ
असि अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा इदमग्नये ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा
वितता महान्तः तेभिर्नोऽ अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्ण
वे विश्वेभ्यो मरुद्भ्यः स्वर्केभ्यः ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय अथा वयमादित्य व्रते
तवानागसोऽ अदितये स्याम स्वाहा इति वरुण पारित्यापारितये आज्यं तेजस्विनां तेज आज्यं पापहरं परं
आज्ये न स्वमुखं दृष्ट्वा सर्वपापैः प्रमुच्यते अथाङ्गन्यासः ॐकारं तु न्यसेन्मूर्ध्नि नकारं नासिकां न्यसेत् मोका
रं तु ललाटे स्यात् भकारं मुखवत्तु गकारं कण्ठदेशे तु वकारं हृदये न्यसेत् तेकारं दक्षिणे हस्ते वाकारं वामतो न्यसे

३४
35

तस्तुकारं नाभिदेशे तु देकारं दक्षिणे पदे वाकारं वामपादे च यकारं पृष्ठिमध्यमे आनाभिमिंद्रदंष्ट्रादी अस्य चास्त्र
दशा विन्यसेत् शिरः प्रभृति यांगेषु पादांतेषु विचक्षणः एवं न्यासविधानेन विपाप्मा च भवेन्नरः यत्र तत्रा ह्रस
भूते प्रशाकिनीभिः पिशाचकैः तस्करैर्भयेद्दैत्यैश्च दंष्ट्रैः स तु नश्यन्ते सर्वैरनैरमंत्रकार्ये ज्वलनार्कसमद्यु
भिः आत्मानं शिवरूपं च स्वशरीरं विचिंतयेत् अष्टादशभुजं चैव चंद्रार्द्धकृतशेखरं नागयज्ञोपवीतं च व
बारूढं सहोमयादेवताः पंच हृदये मंत्रवारुणसंयुताः ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ध्यायेद्देवं परं
शांतं कलापूर्णं गुणपतिं ॐ आवाहयाम्यहं देवं मंत्रमूर्तिं महेश्वरं आगच्छ भवतो ईश अस्मिन् यज्ञे शिवो
भव साध्यतस्त्वामिमां पूजां प्रतिगृह्णीष्व ते नमः त्वमेव परमाशक्तिस्त्वमेव शिधारकः अनया न्यासकृतं दि
णाया देवाचार्यो बृहस्पतिः दिपर्तां ॐ अद्यामुककामनयागणाय प्रादिसप्तलोकपालानामादित्यादिनवग्र
हाणामधिदेवतामधिदेवताः पंचभूतान्यादशादिकपालादीनामावाहनमहं करिष्ये इति प्रतिज्ञा गणेशश्च तथा
ब्रह्माविष्णुरुद्रस्तथैव च लक्ष्मीः सरस्वती चैव सप्तैते पालो महाबलः इति सप्तलोकपालाः ततः ॐकारस्तेत्र

स्ना ऋषिः परमात्मा देवता गायत्री छंदः सर्वकर्मारंभे विनियोगः ॐ भूरादिव्याहृतीनां विश्वामित्रजमदग्निभरद्वा
जां ऋषयः अग्निर्वायुसूर्यो देवता गायत्र्युष्णिगनुष्टुप् छंदांसि सप्तलोकपालाद्यावाहने विनियोगः अथावा
हनक्रमः तत्रादौ सप्तलोकपालानां हरस्मरतनुसंभूत गौरीपुत्र गणेश्वर अविघ्नं कुरु कार्येषु त्वमेहि गणनायकः
ॐ गणानां त्वेति मंत्रेण मंडले त्वं समाविश ॐ गणानां त्वेति वसुऋषिर्गणपतिर्देवता त्रिष्टुप् छंदो गणपत्यावाहने
विनियोगः ॐ गणानां त्वा० ॐ भू० गणपते इहागच्छेह तिष्ठ १ मुखाद्यस्य समुद्भूता अग्निर्भूदेवताश्च भूसुराः तं ज
गत्स्रष्टिकर्तारं विधिमावाहयाम्यहं॥ ब्रह्मजज्ञानमंत्रेणामं ॐ ब्रह्मजज्ञावमितिमंत्रस्य प्रजापतिऋषिर्ब्रह्मादेव
तात्रिष्टुप् छंदः ब्रह्मण आवाहने विनियोगः ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः स बु
ध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॐ भूर्भुवः स्वः ब्रह्मन्निहा० २ शंखचक्रगदापाणिं मसुरारिं
घनद्युतिं संसारतारणं देवं विष्णुमावाहयाम्यहं विष्णोरराटमंत्रेण मंड० विष्णोरराटमिति मेधातिथिर्विष्णुर्देवता०
गायत्री छंदो विष्णोरावाहने विनियोगः० ॐ विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवो

३५
35

सिवेछ्नवमसि विश्वधेत्वा ॐ भू० विष्णोरिहागच्छ ३ त्रैलोक्यभैरवाकारं पूजितं च सुरासुरैः स्व क्षेत्रः मत्तयकर्त्ता
रं शंभुमावाहयाम्यहं नमः शंभवाय मंत्रेण मं० ॐ नमः शंभवयेति वामदेव ऋषिः शंभुर्देवता त्रिष्टुप् छंदः
शंभोरावाह० ॐ नमः शंभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॐ भू
र्भु० शंभो इ० ४ ऐश्वर्यमंगलं कांतिं ददाति परमेश्वरी वासुदेवस्य या कांता लक्ष्मीमावाहयाम्यहं श्रीश्चत इति मंत्रे
णमं० ले० ५ ॐ श्रीश्चत इति मंत्रस्य नारायण ऋषिर्लक्ष्मी देवता लक्ष्म्या आवाहने वि० ॐ श्रीश्चते लक्ष्मीश्च प
त्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं इष्णंनिषाण मुम्म इषाण सर्वलोकम इषाण ॐ भू० लक्ष्मि
इहा० ५ हंसयानां शुभांगीं च वीणापुस्तकधारिणीं सरस्वतीं शुक्लवर्णां देवीमावाहयाम्यहं पंचनद्यः सुमंत्रेण
मं० ले० ॐ पंचनद्य इति ऋषिः सरस्वती देवता छंदः सरस्वत्या आवाहने० ॐ पंचनद्यः सरस्वतीमपियंतु स
स्रोतसः सरस्वती तु पंचधा सो देशेऽभवत्सरित् ॐ भू० सरस्वति इहा० ६ ॐ ग्रामखेटकवासिन् भो सर्वविघ्ने
श्वररमभो क्षेत्रपाल त्वमागच्छ विघ्नतष्ठत्तुरर्च्चयेत ॐ विघ्नतष्ठत्तुरिति ऋषिः क्षेत्रपालो देवता छंदः क्षेत्रपा

लक्ष्यावा ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतः स्पात् सुबाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी ज।
नयन्देव एकः ॐ भूर्भुवः स्वः देवपालाय ॥७॥ इति सप्तलोकपाला वाहनं अथ सूर्यादि नवग्रहाणां यतत्र ग्रह पीठमध्ये
वर्तुले द्वादशांगुले माङ्मुखं रक्तपुष्पाक्षतैः पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः सप्ताश्वरथसंस्थश्च द्विभुजः।
स्यात्सदा रविः भोभो सूर्य ग्रहाध्यक्ष कलिंगविषयोद्भव आकृष्णेनेति मंत्रेण मंडले त्वं समाविश ॐ आकृष्णेने
ति मंत्रस्य हिरण्यस्तूप ऋषिः सवितृदेवता त्रिष्टुप्छंदः सूर्यावेतने विनियोगः ॐ आकृष्णेन रजसा वर्तमानो
निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् ॐ भूर्भुवः स्वः सूर्य इहागच्छ इह ति
ष्ठेति स्थापयेत् ततआग्नेये चतुरस्रे चतुर्विंशांगुले प्रत्यङ्मुखं सोमं श्वेतपुष्पाक्षतैः श्वेतः श्वेताम्बरधरो दशा
श्वः श्वेतवाहनः गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी भोभो चंद्र जगत्त्राण यमुनाविषयोद्भव इमं देवाः
सु मंत्रेण मंडले॰ इमं देवा इति मंत्रस्य गौतम ऋषिः सोमो दे॰ अनुष्टुप्छंदः आवह॰ इमं देवा ऽ असपत्नꣳ सु
वद्ध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वामी राजा सो
ममुष्यै पुत्रः

२६
36

मोस्माकं वारुणाछं गन्ता ॐ भू० चंद्र० ततो दक्षिणाग्निकोणे त्र्यंगुले दक्षिणाभिमुखं भौमं रक्तपुष्पाक्षतैः र
क्तमाल्यांबरधरः शक्तिशूलगदाधरः चतुर्भुजो मेषगतो वरदः स्याद्धरासुतः उज्जयिन्यां समुद्भूत भो भो भौम च
तुर्भुज अग्निर्मूर्द्धेति मंत्रेण मं० अग्निर्मूर्द्धेति विरूपः भौमो० गायत्री० भौमावाहने० ॐ अग्निर्मूर्द्धा दिवः ककु
त्पतिः पृथिव्या अयम् अपां रेतांसि जिन्वति ॐ भू० भौम इ० ततो ऐशान्ये बाणाकारे चतुरंगुले उदङ्मुखं बु
धं पीतपुष्पाक्षतैः पीतमाल्यांबरधरः कर्णिकारसमद्युतिः खड्गचर्मधरश्चैव सिंहस्थो वरदो बुधः अहो चंद्रसुत०
श्रीमन्मगधायां समुद्भव उद्बुध्यस्वेति मंत्रेण मं० उद्बुध्यस्वेति बुधर्मंचस्य नारायण० बुधो दै० त्रिष्टुप्० बुधावा० ॐ
उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते संसृजेथामयं च अस्मिन्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमा
नश्च सीदत ॐ भू० बुध इ० तत उत्तरे दीर्घचतुरस्रे षडंगुले उदङ्मुखं बृहस्पति पीतपुष्पाक्षतैः देवतानां गुरुः श्वे
त वाजिपानश्चतुर्भुजः पीतवर्णः सुवरदः साक्षसूत्रकमंडलुः अहो वाचस्पते त्वं हि संजातः सिंधुमंडले बृहस्प
ते सुमंत्रेण मं० ॐ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात त

दस्यासुहृद्विणं धेहि चित्रम् ॐ भूः बृहस्पते ६० ततः पूर्वे पंचकोणे नवांगुले प्राङ्मुखं शुक्रं शुक्लपुष्पाक्षतैः प्र
विश्य जठरे यो भोनिः स ततः पुनरेव सः तं सुरारिगुरुं भक्त्याऽहमावाहयाम्यहं भो भो भोजपुरे जातभार्गवगोत्र
विभूषण ॐ अन्नादितिमंत्रेणामं ॐ अन्नात्परिस्रुत इति· प्रजापति· शुक्रो· जगती· शुक्रावाहने· ॐ अन्नात्परि
स्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रि
यमिदं पयोऽमृतं मधु ॐ भूः शुक्र ६ ततः पश्चिमे धनुर्विंशांगुले मकराख्यं शनिं कृष्णपुष्पाक्षतैः इन्द्रनीलद्यु
तिः शूली वरदो गृध्रवाहनः बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा अहो सौराष्ट्रसंजातच्छायागर्भसमुद्
भव ॐ शन्नोदेवीः सुमंत्रेणामं ॐ शन्नोदेवी इति मंत्रस्य· सिंधुद्वीप· शनिर्देवता· गायत्री· शन्यावाहने ॥ ॐ श
न्नोदेवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः ॐ भूः शनै· ततो नैर्ऋत्ये सूर्पाकारे द्वादशांगुले द
क्षिणाभिमुखं राहुं कृष्णपुष्पाक्षतैः करालवदनः खड्गचर्मशूलावरप्रदः नीलः सिंहासनस्थश्च राहुरत्र प्र
शस्यते राहो बर्बरके देशे संजातः कायवर्जित कया न इतिमं· ॐ कयानश्चित्र आ इति वामदेवः राहुः गायत्री·

राह्वानेवि० ॐ कयानश्चित्राऽआभुवदूतीसदावृधः सखा कयाशचिष्ठयावृता ॐ भू० राहो इहा ततो वायव्यो
ध्वजाकारे षडंगुले दक्षिणाभिमुखं केतुं धूम्रपुष्पाक्षतैः धूम्रादिवाहनः सर्वेगादिनोविकृताननाः क
पोतवाहनानि त्वं केतव श्रवरप्रदः केतवोविविधाकारा मालयाद्रिसमुद्भवाः केतुं कृण्वन्नितिमंत्रेण मंडले प्रवि
श्योत्विह ॐ केतुं कृण्वन्नित्यृषि० मधुछंदः केतवो० गायत्री० केतूनामावाह० ॐ केतुं कृण्वन्न केतवे पेशो मर्य्या अ
पेशो मर्य्या अपेशसे समुषद्भिरजायथाः ॐ भू केतव इहागच्छंतु इह तिष्ठंतु एवं इति नवग्रहस्थापनं अथा
धिदेवतावाहनं एवं ग्रहाः प्रतिष्ठाप्य स्थापनीयाश्च देवताः तेषां स्थानानि नामानि मंत्राणि प्रवदाम्यहं तत्रे
श्वरो नामास्ति त्रिशिवो गौरी तथा स्कंदो विष्णुर्ब्रह्मा पुरंदरः यमः कालश्चित्रगुप्त आधिदेवाः स्मृता इमे तत्रादौ
रुद्रस्यावाहनं अहोऽशंकरदेवेश शूलपाणे वरप्रद वृषस्कंधसमारूढ उमया सितसन्निभ व्यालयज्ञोपवीतस्त्व
शशांककृतशेखर ॐ त्र्यंबकमिति मंत्रेण स्थापयेत्ततः शिवं ॐ त्र्यंबकमिति वशिष्ठ० रुद्रो देवता अनुष्टु०
रुद्रावाह० ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् इति रुद्रं ततः

ध

शिवइ० इति स्थापयेत् १ राह्वि पार्वति देवेशि वंद्यविंवनिभानने विश्वकर्त्री वीति होत्राम भ्यंवकप्रीतिवर्द्धिनि सो
मस्याग्ने परिधिभागे श्रीश्च ते मेनका मजे ॐ श्रीश्च त इति मंत्रस्य नारायण० लक्ष्मी० अनुष्टुप् गौर्या० ॐ श्रीश्च ते
लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं इष्णं निषाणामुं मइषाण: सर्वलोकमइषाण इ
ति सोमाद्याग्नेर्गौरिमावाहयेत् सेनस्याधिपते वीरस्थारकारेषडननरक्ताम्भोरुक वर्णाभ: शक्तिहस्त: शिखि
ध्वजवरकंदे इति मंत्रेण राह्वि याम्ये कुमारक ॐ यदक्रंद इति मंत्रस्य यामदेव. स्कंदो० त्रिष्टुप् स्कंदाय० ॐ यद
क्रंद: प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् स्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यम्महि जातं ते अर्व
न् इति सोमाद्ग्ने स्कंद इ० लक्ष्मीकपोलसंक्रांतकांतिकौस्तुभसद्युते वैनतेयसमारूढ शार्ङ्गचक्रासिपा
णिक ॐ विष्णो रराटमंत्रेण राह्वि प्राच्यां बुधात्मभो ॐ विष्णोरराटमसीति नारायण ऋषि: पुरुषो० अनुष्टु
प्० विष्वावाहने० ॐ विष्णो रराटमसि० बुधासवै विष्णोइ० गौरवर्णचतुर्वक्त्र लंकृचोपशोभित स्नानपुस्त
कसंयुक्त हंसारूढ पितामह उरीच्यामागच्छ गुरोरावृत्स श्रेतितिष्ठित: ॐ आब्रह्मन्निति० प्रजाति० ब्रह्मा० त्रिष्टुप्०

३०
28

ब्रह्मावाह० ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां
दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां
निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नः ओषधयः पच्यन्तां योगक्षेमो नः कल्पतां ॥ उत्तरे ब्रह्मत्रि
हा० द्विपस्कंधसमारूढ सुशोभितमहासन हरितालसुवर्णाभ सर्वदेवनमस्कृत मगोः समीपे पूर्वस्यां स
जोषा इति० विश्वामित्र० इंद्रो० त्रिष्टुप्० इंद्रावाह० ॐ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर वि
द्वान् जहि शत्रूँरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः मगोः पूर्वे इंद्र इहागच्छेह० धर्मराज महाकाल
दंडपाणे भयंकर महाशस्त्र महिषारूढ देवसेनाप ने यम यमाय त्वेति मंत्रेण राहो पश्चिमतः शनेः ॐ यमाय त्वेति०
दध्यं अथर्वण ऋषिः० यमो० गायत्री० यमावाहने ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता म
ध्वानक्तु पृथिव्याः संस्पृशस्पाहि अर्चिरसि शोचिरसि तपोसि शनेः पश्चिमे यम इहा० राहोरधिपते का
लभीम नीलांजनप्रभ स्वकर्मबद्धसंयोग मृत्यो ... यमसे ... कर्षि रसीति मंत्रेण दीप्यामागच्छ राहुतः ॐ का

क्षिरसीति मंत्रस्य प्रजापतिः कालो देवः अनुष्टुप् कालावाहने ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि सं

मापो अद्भिरग्मत समोषधीभिरोषधीः आ नेसपत्नघ्नमग्नेऽमुम्न्मम वाचा वाजेषु यजनी सरंतास रस्वती रि

षः स्वाहा एहोहि नरे काल इह॰ चित्रगुप्तमनिरातंकनमः कांचनसन्निभ शुभाशुभं नराणां कर्मलेखको स्येहितम

रः चित्रावसोऽस्तु मंत्रेणाकेतो वायव्यमंडले ॐ चित्रावसो इति॰ वसव ऋषयः चित्रगुप्तो॰ गायत्री चित्रगुप्ता

वाहने॰ ॐ चित्रावसो स्वस्ति ते पारमशीय केतोर्वायव्ये चित्रगुप्त इह॰ इति देवतावाहनं अथ अधिदेवतावा

हनं ग्रहाणां देवताः एताः स्मृताश्च अधिदेवताः अथैषां नामानि अग्निरापो मही विष्णुरिंद्र इंद्राणिका तथा

प्रजापतिर्भुजंगाश्च ब्रह्मा चैवाधिदेवताः अथावाहनं रोहितपिंगल चतुर्भुजहस्त वाहन पावक त्रय स्त्रिंशत्सु

रान्तर्वा नयस्व पितवा नतर्पितः आदित्य रुद्र मध्ये स नः पितेति समाविश ॐ स नः पितेति॰ मधुछंद॰ अग्निः॰

गायत्री॰ अग्नेरावाहने॰ ॐ स नः पितेव सूनवेऽग्ने सूपायनो भव सचस्वा नः स्वस्तये रुद्रा द्वाग्नेयेऽग्ने

इह॰ आगच्छ भो सरासो महापं स्वरूप चतुर्भुज प्रकृत्माती चशिशिर जगत स्मानि वर्त्तक आपोऽथ यात्सुमं

६

३९

39

त्रेण शिवायाने र्चनेद्यपः ॐ आपो ऽ अद्येति प्रजापतिः० आपो० पंक्ति० अपामावाहने० ॐ आपो ऽ द्या अन्ववा
रिषव्छं रसेन समसृक्ष्महि पयस्वानग्न ऽ आगमन्तम्मासछं सृज वर्चसा प्रजया च धनेन धे इति जलमायाने अर्ट
ने आयद्दहागच्छंतु हन्ति इन्तु अग्नीमीत्वावराहेणा समुद्धृतासि वसुंधरे एहि काश्यपिदेवे शिष्पामे पंचगुणान्विते
ॐ स्थिरसीति मंत्रेण स्कंधाद्यातेमहीमञ्जनत्: ॐ स्थिरसीति प्रजापतिः० पृथ्वी० गायत्री० धरावाहने० ॐ स्थिरसि तन
पारे वन्नयाद्भि रष्टु वासीत्यरिचि दसितपारे वयाद्भि रस्व दुवासीरा इति स्कंदाद्यापोप थिवीहाग० मालाचक्रग
दापद्मशंखकौस्तुभधारक एहि नीलोत्पलश्यामसुपर्णरथ माधव इदं विष्णुः सुमंत्रेण विष्णुनारायणे तरेद
इदं विष्णुरिति० मेधा० नारायणो देवता गायत्री० विष्णवावाहने विनियोगः इदं विष्णुर्विचक्रमे त्रेधा निदधे पद
म् समूढमस्यपांछं सुरे स्वाहा इति केशवाद्यन्तरे विष्णोरिदं० उच्चैःश्रवसमारूढ वज्रहस्तपुरंदर देवाधिपमहा
राजसमागच्छ महाप्रभो इंद्र आसान्न सुमंत्रेण त्रसो तरत आविश इंद्र आसन्नंत इति प्रमतिश्च आ० विरिंदो०
त्रिष्टुप्० इंद्रावाहने वि० इन्द्र आसान्नेतावह स्वस्तिर्हिरण्यपर्णेपुरं तु सोमदे वसे नाम मिमं जती नां जय मीना

मरुतोयत्वग्मम् ॐ भूः ब्रह्मणा वत्तरेइं इइः देवेशि वज्रपद्माङ्किकरे कुंभकुचस्यले समागच्छ महादेवि पीतवर्णे
पुलोमजे इन्द्रं देवीति मंत्रेण इंद्राणी शक्र एर्वतः ॥ इन्द्रं देवीति मंत्रेण इंद्राणी शक्र एर्वतः ॥ इन्द्रं दैवीनि मधुछ
न्दा ॥ इन्द्राणी ॥ देवता ॥ इंद्राण्यावाहने विनियोगः इन्द्रं दैवीर्विशो मरुतोनुवर्त्मानोभवन्त्वथे न्द्रं दैवीर्विशो
मरुतो नुवर्त्मानोभवत् एवमिमंयजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु शाक एवं· इंद्राणी हा
ग· अहो ब्रह्मन् समागच्छ जगत्स्रष्टः प्रजापते नवग्रहमखे ह्यस्मिन्नुगेस्व वर्णस्तुरजितः प्रजापते सुमंत्रेण
यमायाम्ये प्रजापतिः ॥ प्रजापते इति हिरण्यगर्भ ऋषिः प्रजापतिर्विष्टुप् ब्रह्मावाहने ॥ ॐ प्रजापते नत्वादेता
न्यन्यो विश्वा रूपाणि परिता बभूव यत्कामास्ते जुहुमस्तन्नो ऽस्तु वयं स्याम पतयो रयीणाम् इति यमाह्
त्रिणे प्रजापते इहागच्छेह ॥ आग्नेयी विप्रसमागच्छ राहोः प्रत्यधिदेवते मणिरत्नगणाध्यस्तफलारत्नविभूषि
तः नमोस्तु सर्प मंत्रेण कालद्याम्ये सरीसृपा· ॐ नमोस्तु सर्पेभ्य इति ॥ प्रजापति ॥ सर्पो ॥ अनुष्टुप् सर्पावाह
ने ॥ ॐ नमोस्तु सर्वेभ्यो ये के च पृथिवीमनु येन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः पाइब्रवो यातुधानानां येवा

५०
40

वनस्पतीरनुयेवावटेषुशेरतेतेभ्यः सर्वेभ्योनमः येवामीरोचनेदिवोयेवासूर्यस्यरश्मिषु येषामप्सुसदस्कृतं
तेभ्यः सर्वेभ्योनमः इतिकालयाम्यौसर्पाइहागच्छंतिहतिष्ठंतुस्वयंभूस्त्वंसमागच्छब्रह्मन्त्रयक्षसंभवभू
र्ल्लोकेसत्यलोकेचतपोलोकेव्यवस्थित ब्रह्मयज्ञानमंत्रेणविन्यस्यपूर्वतः ॐ ब्रह्मायज्ञानमितिऋ
षिर्ब्रह्मा॰ छंदोब्रह्मावाह॰ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनआवः सबुध्न्याउपमा
अस्यविष्ठाःसतश्चयोनिमसतश्चविवः त्रित्रस्यासवैब्रह्मन्निहा॰ इत्यधिदेवतावाहनं अथानंतरंप्रत्य
धिदेवतावाहनंज्ञातव्यं तदनंतरंपंचलोकपालावाहनंज्ञातव्यं मयायत्त्वधिदेवताभ्यः पंचलोकपालाभ्य
मेणलिखिताः अथपंचयज्ञभूतात्मलोकपालावाहनं अथैषांनामानि विनायकस्तथादुर्गावायुराका
शमेवच अश्विनौचैवपंचैतान्लोकपालान्प्रपूजयेत्शनैः केनोष्ठपूर्वेगणपतेः स्याज्ञपश्चिमे लंबो
दरंमतिष्ठाप्यसर्वदेवसमन्वितंगुणांगोत्वेतिमंत्रेणमंडलेतुसमाः विश ॐ गणानांत्वेतिगृत्समदः
गणपतिः त्रिष्टुप्॰ गणपत्यावा॰ ॐ गणानांशानिकेवोः पूर्वेगृहहसपर्योः पश्चिमेगणपतेइहा॰

महाकालि महादुर्गे खड्गहस्ते धुर्जुह्दे विंध्याचलसमासीले अंबिके सिंहवाहने जातवेदसमंत्रेण दुर्गां रीच्यां गणे
शतः ॐ जातवेदसे इति कश्यप० दुर्गादेवता त्रिष्टुप्० दुर्गावाहने वि० ॐ जातवेदसे सुनवाम सोममरातीयतो नि
दहाति वेदः स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः ॥ गणेशो दीच्यां दुर्गे इहाग वायो ये ते हि मं
त्रेण वायव्यां दिशि मारुतः ॐ वायो ये त इति० अंगीरा० वायु० गायत्री० वायोरावाहने० ॐ वायो ये ते सह
स्त्रिणो यथा शस्ते भिरागहि नियुत्वा सोमपीतये गणेशाद्वायव्यां वायो इ० ॥ सुररत्नमहानीलतारागण०
विभूषित ब्रह्मांडदुर्गामध्यस्थ लोकपालावकाशकः ॐ घृतं घृतेति मंत्रेण काशयग्धि मआवि ॐ घृते
घृतेति० मरीचि० आकाशो० गायत्री० आकाशावा० ॐ घृतं घृतपावानः पिबत वसां वसापावानः
पिबतान्तरिक्षस्य हविरसि स्वाहा दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ग० प० आका
शाद्० सूर्यस्तनयावेत्नो वासुदेवमनोरमौ दिव्यजो दैवराजस्यवै द्यौ रूपेण गर्विणगर्वि तौ यान्यां कश
तिमंत्रेण पूर्व आवि शातं प्रवां ॐ यावां कशेति० अश्विरश्विनी कुमारावा० ॐ यावां कशा मधुमत्यश्वि

८

४१
41

मास्त्व वतीनयाङ्ग «प» मिमिन्द्रं तं गणेशान्पूर्वे अश्विनी कुमारा विहागच्छं तं तिष्ठन्तं इति पंचलोकपाला
वाहनं अथ प्रमथाधिदेवतावाहनं आ नो भद्रा अनंतं वरवे: पूर्वो प्रपूजयेत् आ नो भद्राः क्रतवो यन्तु
विश्वतोऽदब्धासो अपरितास उद्भिदः देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे १ रुद्र:
पूर्वे अनंतदे: देवानां वा मुक्तिं चैव सोमस्याग्नेयं प्रपूजयेत् सोमस्यं भद्रा सुमतिर्ऋजूयतां देवानां
रातिरभि नो निवर्त्ततां के इ हां० २ तान्पूर्वया निभौमस्य तत्कं स्थापयेत् तुरः ॐ तान्पूर्वया निविदा
हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् अर्यमणं वरुणं सोमम् अश्विना सरस्वती नः सुभगा म
यस्करत् भौमस्याग्नेय तत्क इ० ३ तन्नो वा नैर्ऋत्य कौरे पूजयेत् उत्तरे बुधात् तन्नो वातो मयोभु वातु
भेषजं तन्माता पृथिवी तत्पिता द्यौः तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या यु
वं बुधाद् उत्तरे कौरे इ० ४ तमीशानेति पवं तु गुरोरग्ने निधापयेत् तमीशानं जगतस्तस्थुषस्पतिं
धियं जिन्वमवसे हूमहे वयम् पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये गुरो रग्ने पश्च

इहागछे ॥४॥ महापद्यं तु पूर्वस्य स्वस्तिनः सौम्यंतो यजेत् ॐ स्वस्तिन इंद्रो वृद्धश्रवाः स्वस्तिनः पूषावि
श्ववेदाः स्वस्तिनस्तार्क्ष्यो ऽरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु पूर्वस्योत्तरे महापद्मे इ० ६ पृषदश्वेति
पूर्वेणाग्नेः शान्तं मंत्रं यजेत् ॐ पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः अग्निजिह्वा
मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ईशाने पूर्वशंखम् इहा० ॥७॥ भद्रं कर्णेतु रातो ध्वकंबलं
पूर्वतो न्यसेत् भद्रं कर्णेभिः शृ ।णु: यामदेवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनू
भिर्व्यशेम देवहितं यदायुः ईशानः पूर्वे कंबल इहा० दशातम न्वेति केतो ध्व पूर्वेण पुलकं यजेत् ॐ
शतमिन्नु शरदो ऽन्ति देवा यत्रा नश्चक्रा जरसं तनूनां पुत्रासो यत्र पितरो भवंति मा नो मध्या रीरि
षतायुर्गंतोः पूर्वे पुलक इहा० ॥८॥ इति मत्स्याधिदेवतास्थापनं अथा अश्विनातेजसा चक्षुर्मां ॐ अश्वि
ना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् वाचेंद्रो बलेनेंद्राय दधुरिंद्रियम् पूर्वे ऽश्विनि इहागछे ह० भर
णीषु यमाय च यमाय त्वामखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः संस्पृशस्पा

४२ 42

हि अर्चिरसि शोचिरसि तपोसि ए० वैभरणीहाग्नये ह० २ कृत्तिका चायमग्निष्ट अयमग्निः सहस्रिणो वाजस्य
शतिनस्पतिर्मूर्द्धा कविरयीणाम् ए० कृत्तिके इ० ३ ब्रह्मजज्ञेति रोहणी ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतः सु
रुचो वेन आवः सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः एवै रोहिणी हा० ४ सोमो धेनुम्मृ
गशिरा उ० सोमो धेनुं उ० सोमो ऽर्वन्तमाशुं सोमो वीरङ्कर्मण्यन्ददाति सादन्यं विदथ्यं सभेयं पितृश्रव
णं यो ददाशदस्मै ए० मृगशिरे इ० हा० ५ नमस्ते रुद्रमं उ० नमस्ते रुद्र मन्यव उतो त इषवे नमः बाहुभ्यामु
त ते नमः ए० आर्द्रे इ० हा० ६ अदितिर्द्यौः पुनर्वसु उ० अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता सपिता स पु
त्रः विश्वेदेवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वम् ए० आर्द्रे इ० हा० ६ अदितिर्द्यौः पुन
र्वसुं उ० अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता सपिता सपुत्रः विश्वेदेवा अदितिः पंचजना अदिति
र्जातमदितिर्जनित्वम् एवै पुनर्वसो इ० ७ पुष्यः वाचस्पतेति च उ० वाचस्पतये पवस्व वृष्णो अंशुं स
भ्यां ऽभस्तिपूतः देवो देवेभ्यः पवस्व येषां भागोसि इत्तिणे पुष्ये इ० ८ सर्पेभ्यः सपदैवतं उ० नमोस्तु स

र्पेभ्यो ये के च पृथिवीमनु ये ऽन्तरिक्षे ये दिवि तेभ्यः सर्वेभ्यो नमः इति॰ अग्नये स्वाहा॰ एवं ॐ पितृभ्यः स्वधा
यिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्न पित
रो ऽमीमदन्त पितरो ऽतीतृपन्त पितरः पितरः शुंधध्वम् इति सोमाय स्वाहा॰ १० ॐ भगप्रणेतर्भगं पातु ॐ भगप्र
णेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम प्रथमं विष्णु
मन्त्रेण ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवो ऽसि वैष्णवमसि विष्णवे त्वा इत
रेभ्य वराः ६०२३ ध्वनिः सं वसुधारया वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सवि
ता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः इत॰ ध्वनिः स्वाहा॰ २४ वारुणेन च वारुणं ॐ वरु
णस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमासीद इत
रेष्टानभिषे स्वाहा २५ अजपादुत नो हिर्बुध्न्यः ॐ अजनो हिर्बुध्न्यः शृणोतु अजएकपात् पृथिवी समुद्रः विश्वे देवा
ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु पूर्वाभाद्रपदे स्वाहा॰ २६ शिवो नामेत्यहिर्बुध्न्यं ॐ शि।

वो नामासि स्वधितिस्ते पिता नमस्ते ऽस्तु मा मा हिंसीः निवर्त्तयाम्यायुषे न्नाद्याय प्रजननाय रायस्पोषाय सु

प्रजास्त्वाय सुवीर्य्याय उत्तरे उत्तरस्मात्पदे इहा० २॥७॥ एतत्सं एषं नवे त्रिच ॐ एषं त त्वने वुय त्रिरिक्षेम कदावन

स्तोतारस्तः इह हस्त गि उत्तरे रेवतीहा० २८ इत्यष्टाविंशति नक्षत्रावाहनं अथ विष्कंभादियोगाविंश

तियोगावाहने योगे सु मंत्रेण योगं स्तत्रमपूजयेत् ॐ योगे योगे तवस्तरं वाजे वाजे हवामहे सखाय इन्द्रम्

तये शोभनादिकोणे षु सप्तसप्त योगा इहागच्छन्तु इह तिष्ठन्तु इत्यष्टाविंशति योगावाहनं अथ करणावाहनं

भद्रं कर्णेभिरिति मंत्रेण करणानि वदन्तिणे ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तु

ष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः दक्षिणे करणानीहागच्छन्तु इह० इति करणानि अनेवादि रा

श्यावाहनं श्री वेदियोत्ति यत्पूर्वभोमेषो नः परस्य नः होराकोभ्यां वलोरक्त मत्तु घ्या न्वमुराद्ततः अग्नि

ने इति मंत्रेण राशीन्द्वादश पूजयेत् अश्विनेशयोः अस्ति वीर्याय मारण येषेष्वम तोगर हाभ्यां सरस्वत्यु

यवाके मनस्यां मेर्व हि वद्रे ये जानः ईशादि चतुःकोणे षु मेषादय स्तूयस्त योराशय इहागच्छन्तु० इति श

४४ ५५

शिलास्थापनं अथ नागस्यावाहनं वाना पीभक्षितो येन महोदधिः इंद्रस्य क्रोडमैरागस्तमावाहयाम्यहं ॐ
इंद्रस्य क्रोडेऽहिते ये पाजस्यं दिव्यां यत्र वो दिते भ समस्ता नद्द्रक्तीपस्ते नां नरित्तं ॐ उरीततान उदयैनाचक्र
वाकौ मनस्मां भां रिवं रकाम्भो गिरीनूह्णासिधिरुपला वह्ली क्लीवल्मीकान् क्लौमममियुलतानूनि
राश्रुवंतीह्रदान्कुक्षिभ्या ॐ समद्रस्मुद्रेण वैश्वानरं मस्मना ॐ दक्षिणेऽनस्मद्द्दहाग० अथ ध्रुवावा
हनं मासं च येनात्तयपरं मधुसूदन भक्षितः सप्तद्विगहनाय्यं तं ध्रुवमावाहयाम्यहं ध्रुवोसीति सुमंत्रे
णत्वमेद्योत्तानपादज ॐ ध्रुवोसि ध्रुवोयं यजमानेऽस्मिन्नायतने प्रजया पशुभिर्भूयात् घृतेन द्या
वापृथिवी पूर्येथामिंद्रस्य छदिरसि विश्वजनस्य छायात् ॐ नरे ध्रुवाः ३ अथ सप्तऋष्यावाहनं आपांतु (
ऋषयः सर्वे यज्ञेरीपितते जसः सप्तऋषयः सुमंत्रेणऽनेनागच्छन्तु मामकी ॐ सप्तऋषयः प्रतिहिताः
शरीरे सप्त ऋक्षंति सदमप्रमादं सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवा
द्वे वो ध्रुवमद्दक्षिणां सप्तर्षयद्दहागच्छं अथ वसूनावाहनं वसुनामानि पुरो ध्रुवमथ सोमश्चैवानिलो

केवलः प्रत्यूषश्च प्रभासश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः वसूनावाहयिष्यामि देवानष्टौ वरप्रदान् आ
यांतु नेतयोयुक्ता जाह्नवीदेहसंभवाः वसुभ्यस्त्वेति मंत्रेण एजांग हूं तु मामकी ॐ वसुभ्यस्त्वा रुद्रेभ्यस्त्वा
संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावतां व्यंतु वयोक्तं रिहाणा मरुतां पृषतीर्गच्छ वशा पृ
श्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह चक्षुष्पा अग्नेसि चक्षुर्मे पाहि वायव्योत्तरयोर्मध्ये अष्टौ वसव
इहागच्छंतु अथैकादश रुद्रावाहनं रुद्रनामानि मृगव्याधश्च सर्वश्च मृगव्याधस्तृतीयकः अजैक
पाद्दहिर्बुध्न्यः पिनाकी ?? एव च दहनश्चेश्वरश्चैव कपाली न वमस्तथा वृषाकपिश्च दशमो रुद्रास्त्र्यंब
कस्तथैव च रुद्रानावाहयिष्यामि त्रिनेत्रान् वृषभध्वजान् आयांतु वरदा रुद्रा रुद्रमंत्रेषु संस्थिताः रुद्रास
मिति मंत्रेण एजांग हूं तु मामकी ॐ रुद्राः सꣳसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे तेषां भानुरजस्र इच्छुक्रो
देवेषु रोचते सꣳसृष्टो वसुभी रुद्रैर्धीरैः कर्मण्यां मृदं हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् उत्तरे
शानयोर्मध्ये एकादश रुद्रा इहागच्छंतु ॥ द्वादशादित्यनामानि वरुणश्च तथा सूर्यो भानुः ख्यातस्तथा पनः

इंद्रश्चैवार्यमा चैव धाता वै वभगस्तथा गभस्तिर्धर्मराजश्च द्वादशोन्ते च भास्कराः ॐ सूर्यानावाहयिष्यामि
देवानद्भुततेजसः आयांतु वरदाः सूर्याः सर्वैते तेजसाधिकाः सवितामयमसंत्रेणाद्भुतो॰ ॐ सविताप
थमेहन्यग्निर्द्वितीये वायुस्तृतीय आदित्यश्चतुर्थे चंद्रमा पंचम ऋतुः षष्ठे मरुतः सप्तमे वृहस्पतिरष्टमे
मित्रो नवमे वरुणो दशमः इंद्र एकादशे विश्वेदेवा द्वादशे ईशान एवं यो मंध्ये द्वादशादित्या इहागछं॰
अथ विश्वेदेवावाहनं विश्वानावाहयिष्यामि देवतानां वरप्रदान् आयंतु मम यज्ञे ते वि॰ विश्वेदेवास्त्र
योदशः विश्वेदेवाः सुमंत्रेण पूजा गृह्णंतु मामकी ॐ विश्वेदेवा अछं सुष्टुमो विसुराची तया आप्या
यमानो यमस्तूयमाने विभुः संभयमाणो वायुः पूयमानः शुक्रः एतशुक्रः क्षीरः श्रीमंथी शतं कुंभी र्वि
श्वेदेवास्त्रयमसे वृत्रीतो सुहोमापो घृतो रुद्रो हूतमानो वाजो भक्षो नचक्षाः मतिः सानो भस्तो भर
स्यमाणः पितरो नरासंछंसाः इंद्राग्ने ययोमध्ये त्रयोदशा विश्वेदेवा इहागछं अथ पित्रावाहनं अह
मावाहयिष्यामि पितृस्तांस्तेजसोधिकान् आयंतु पितरः सर्वे यज्ञांते शुभदायकाः पितृभ्यः स्वधति

मंत्रेण पूजा॥ गृहं तु मामकीं ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधान
मः अत्र पितरो मीमदंत पितरो तीतृपंत पितरः शुंधध्वं आग्नेययाम्ययोर्मध्ये पितर इहागच्छ॰ अ
थ नागावाहनं नागानावाहयिष्यामि भुजंगान् सर्वगोचरान् आयांतु वरदा नागास्त्रैलोक्ये विविधा द
याः नमोस्तु सर्पमंत्रेण पूजा॰ ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु ये ऽन्तरिक्षे ये दिवि तेभ्यः सर्वेभ्यो
नमः या इषवो यातुधानानां ये वा वनस्पतीरनु ये वा वटेषु शेरते तेभ्यः सर्पेभ्यो नमः ये वामी रोचने दिवो ये
वा सूर्यस्य रश्मिषु येषामप्सु सदस्कृतं तेभ्यः सर्वेभ्यो नमः याम्यनैरृत्ययोर्मध्ये नागा इहागच्छ अ
थ समुद्रावाहनं समावाहयिष्यामि सागरान् जगतः प्रियान् सागराः शीघ्रमायांतु रसधारवि
धारकाः समुद्रायेते मंत्रेण पूजा॰ समुद्राय त्वा वाताय स्वाहा शरिराय त्वा वाताय स्वाहा अनाधृष्या
य त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा ऽवस्यवे त्वा वाताय स्वाहा शिमिराय त्वा वाता
य स्वाहा नैरृत्ये वारुणीमध्ये समुद्रा इहागच्छ अथ पंचभूतावाहनं विनायकस्त्वस्य पादुर्गा यासुरा

१३

४६
५०

काशमवष्विनोरस्त्राभूतात्मकाः पंचपूजांग(न्) हुत्वानु मे मस्त्वेयेभ्यवानांतुमंत्रेण भवंतु वरदा अमी ॐ
येभूतानामधिपतयो विशिखासः कपर्दिनः तेषां सहस्रयोजने वधं न्वा निततन्मसि वारुणावा
यव्ययोर्मध्ये च भूतात्मानं इहागच्छे अथ ऋत्वावाहनं वसंतो ग्रीष्मकश्चैव प्रावट्कालः शरत्तथा
हेमंतः शिशिरश्चैव ऋतूनावाहयाम्यहं वसंतायेति मंत्रेण पूजा ॰ ॐ वसंताय कपिंजलानाला
नालभते ग्रीष्माय कलविंकान् वर्षाभ्यस्तित्तिरीञ्छरदे वर्त्तिका हेमंताय ककरीञ्छिशिराय विकक
रान् वरुणवायव्ययोर्मध्ये षड् ऋतव इहागच्छंतु ॰ अथ मेघावाहनं आवर्तः प्रथमो मेघः संवर्त
स्तु द्वितीयकः तृतीयो द्रोणनामा च पुष्करावर्तकश्चतुर्थकः आयांतु वरदा मेघा लोकपालनतत्पराः
वातायस्वेति मंत्रेण पूजांग(न्) हुत्वा ॰ ॐ वाताय स्वाहा धूमाय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वा
हा स्तनयते स्वाहा शीघ्रं वर्षते स्वाहा उद्गृणानाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहा
शीघ्रं वर्षते स्वाहा उद्गृणानाय स्वाहा पश्यते स्वाहा शीकायते स्वाहा पुष्वाम्यः स्वाहा ह्रादुनीभ्यः स्वा

हानीम्पर्स्विहा चतुर्दिक्षु चत्वारोमेघा इहागच्छंत्वि अथ चतुःषष्टि योगिन्यावाहनं आग्नेये चतुः षष्टियोगिन्या
इहा० अथसप्तमात्राबाहनं यो वः शिवोतिमंत्रेणाह्य तत्रेमातृमंडलं ब्राह्मीमाहेश्वरी चैवकौमारीवैष्ण
वी तथा वाराही चतथैंद्राणी चामुंडासप्तमातरः ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मा
तरः स्माऽ अरंगमाम वः यस्य क्षयाय जिन्वथ आपो जनयथा च नः उत्तरे मातर इहागच्छं अथ सप्तद्वीपा॰
वाहनं सप्तद्वीपसमुद्राणां पातालनलमूर्द्धजं जंबूद्वीपे प्रतिष्ठाप्य पूजानइति मंत्रतः ॐ पुंजानयम्प्रिमे जं
बूद्वीपे इहागच्छेह० शाकद्वीपं ततस्थाप्य शादंद्रष्ट्रि ऋचेमपि ॐ शादंद्रष्ट्रि शाकद्वीप इहाग २ कुशद्वी
पमिषे त्वेति कौंवः कुसोसि मंत्रतः ॐ इषे त्वोर्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय॰
कर्मण आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवाऽ अयक्ष्मा मा व स्तेन ईशत माघशं
सो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि पश्चिम कुशद्वीप इह० ३ ॐ कुसोस्मा
ॐ क्रौंचद्वीप इहा० ४ शाल्मलिं समिधाग्निंतु गोधंतु वनस्प॰

तिं ॐ समिधाग्निं पश्चिमे शाल्मलिद्वीपइ० गोमेधं तु
पश्चिमे क्षलदद्वीपइ० पुष्करं मधिगृह्य तु मिद्विपान्या यां दिशिन्यसेत् मधिगृह्य मि
पुष्करद्वीपइहा० इति सप्तद्वीपास्थापनं अथ पातालादि सप्ताधोक
स्थापनम् पातालतलपर्यंतं यमायत्वेति मंत्रतः ॐ यमायत्वामखायत्वासूर्यस्यत्वातपसे देवस्त्वासवि
ताम्ध्वानक्तु पृथिवाः संस्पृशस्पाहि अर्चिरसितपोसि उत्तरेपातालइ० रसातलमयोरेवा
तलातलध्रुवद्धितिः ॐ अपोरे उत्तरेरसात
लइहा० ध्रुवक्षिति उत्तरेतालातलइहा०
अतलंसुसमिद्धापिसुतलंतु अमेवनः सुसमिद्धायउत्तरे अतलइहा० ॥ ॐ अमेवन०
उत्तरेसुतलइ० वितलं
पयपृथिव्यां तुलं हृस्मोसिमंत्रनाः ॐ पयः पृथिव्यां पयऽओषधीषुपयो दिव्यंतरिक्षे पयोधाः

पयः स्वतीः परिश्रः संतु म सुंवितल इहागछेह॰ ॐ कस्योस्यात्वरितलइहागछेह पश्चिमायां
दिशायां तुम्यसेत्वातालसमकं अथभूर्लोकादिति मोर्द्धा लोकस्यापनं ऊर्द्धमर्द्धे तु लोकानां समकं
चोत्तरेन्यसेत् अस्मिन्नूर्जंतु भूर्लोका ॐ अस्मिन्नूर्जंतु ततरेभूर्लो
क इ॰ १ ॐ॰ भुवर्लोक इ॰ शष्टोदिवीति स्वर्लोकं समिद्धो सिस्तपा
महः अष्टहे दिवि अथस्वर्ग
लोक इहागछेधा॰ योनः पिताजनलोकं तपश्च तपस्मस्तपः योनः पिता
तपोलोक इहा अयंगो रितिमंत्रेणासत्यलोकप्रतिष्ठतां ॐ अ
यंगो सत्यलोक इ
हागछेह तिष्ठ इत्यूद्धसप्तलोकाः अथनदीस्थापनं घृतवाच्छदणे नद्यपंचन द्येतिमंत्रतः ॐ पंचनद्य
सरस्वतीमपियंति स्वस्रोतसः सरस्वतीतु पंचधासो देशेभवत्सरित घृतवाद्दहिणे नद्य इहागछंतिह॰

अथपर्वतावाहनं ध्रुवाद्युत्तरदिग्भागे यपर्वतसेतिपर्वतानाः ॐ यपर्वतस्यदधमस्पष्टश्चा त्रवम्भ्ररालिस्वासि
वऽइ यात्रानाश्चावबध्न्नह वधाशगुरश्चाउ अहिंधु ध्रुवमनुरीषमाराणाः विष्णो र्विक्रमसिद्धि ष्णो र्क्रिंक्रो
नमस्ति ध्रुवाद्युत्तरेपर्वतान् इहा० यवोजस्तेति मंत्रेणारे वंतेरविपूर्वतः ॐ जवो यस्ते वाजिन्निहि तोगुहाय
ष्पेतेयरीतो अवरञ्चवाते तेनवो वाजि श्रीलवा श्वैलेन वाजजि त्वमवसमने चपारयिष्णुः वाजिनो वा
जजितो वाजं सरिष्यंतो बृहस्पतेर्भागमवजिघ्रतः रविपूर्वैरवेस्मिन्हागच्छेहतिष्ठ धारीशानदि
ग्भागे सुपर्णोसीति पत्निराट् ॐ सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरोगायत्रं चक्षुर्बृहद्रथंतरे पक्षौस्तोम
ऽइ आत्माछंदांसि अंगानि यजूंषि नामसाम तेतनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफा
फाः सुपर्णोसि गरुत्मान्दिवं गच्छ स्वः पत वृधारीशाने गुरु इहा० अथैशान्यां रुद्रे कलशस्थाप
नं भूरसीत्यादि मंत्रेण कलशो सुप्रतिष्ठिते असंख्यातेति सहस्रोरुद्रोरुद्र यद्यपामसि ॐ असंख्याताः
सहस्राणि ये रुद्रा अधिभूम्याम् तेषां सहस्रयोजने वधन्वानि कालशे रुद्र इह० रुद्रो विष्णुः स्वस्त

ॐ नवामे दक्षे प्रजापतिः ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिꣳ सर्वतस्पृत्वात्य
तिष्ठद्दशांगुलं रुद्रामेविष्णो इ० ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव यत्कामास्ते
जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् रुद्राह्विणे प्रजापते इहा० रुद्रकुंभाग्नतः ध्रुव्याचा
मुंडाज्जातवेदसे ॐ जातवेदसे सुनवाम सोममरातीयतो रनैदः ति वेदः ॥ स नः पर्षदति दुर्गाणि विश्वा नाव
वेव सिंधुं दुरितात्यग्निः १ कुंभाग्ने दुर्गे इहा० क्षेत्रपालमध्याग्नेय्यां सर्वेभ्य इति मंत्रतः ॐ नमोस्तु स
र्वेभ्यो ये के च पृथिवीमनु ये अंतरिक्षे ये दिवि तेभ्यः सर्वेभ्यो नमः चंडाग्नेय्यां क्षेत्रपाल इहा० भूय स्वेति
भूतानि ॐ भूतायत्वा नारातये स्वरभिवेकु व्येषं दृꣳहंतां दुर्याः पृथिव्यां मूर्वंतरिक्षमन्वेमि पृथिव्या
स्त्वा नाभौ सदयाम्यदित्या उपस्थेग्ने हव्यꣳ रक्ष ॐ विश्वकर्मन्निति विश्वकर्माणं विश्वकर्मन्निति विश्वभौ
वनत्र० विश्वकर्मा देवतात्रिष्टुप् विश्वक० प्री० वि० ॐ विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथि
वीमुत द्याम मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु वि० इ० ग० अथ चतुर्वेदस्थापनं

अग्नेर् ऋः ॥ एवैंतोस्यर्यप्यो अग्निमीलेतिमंत्रतः ॐ अग्निमीलेपुरोहितंयज्ञस्यदेवमृत्विजम् होता
रंरत्नधातमम् एवं ऋग्वेदं ह्वा॰ इषेत्वेतिमंत्रेणयजुर्वेदस्य दक्षिणे ॐ इषेत्वोर्जेत्वा वायवस्थदेवोवः
सविताप्रार्पयतुश्रेष्ठतमायकर्मणऽ आप्यायध्वमघ्न्या इंद्रायभागंप्रजावतीरनमीवाऽ अयक्ष्मामा
वस्तेनईशतमाघशंसोध्रुवाऽ अस्मिन्गोपतौस्यात बह्वीर्यजमानस्यपशून्पाहि अग्न आयाहि
मंत्रेणसामवेदंतुपश्चिमे ॐ अग्न आयाहि वीतयेगृणानो हव्यदातये निहोतासत्सिबर्हिषि ॐ
पश्चिमेसामवेदं ह्वा॰ श॰ नोदेवीतिमंत्रेणाथर्वाणमथोत्तरे ॐ शन्नोदेवीरभिष्टय आपोभवंतु ।
पीतयेशंयोरभिस्रवंतुनः उत्तरे अथर्ववेदः अथदशदिक्पालावाहनं इन्द्रोवह्निर्यम
श्चैवनिर्ऋतिर्वरुणोमरुत् कुबेर ईशः ए॰ शेषश्च ब्रह्मा दशदिगीश्वराः अथैषांस्थापनं इं
मन्त्रेणवा॰ त्रातारं वज्रपाणिं महाबलं त्रातारमिंद्रमंत्रेण इंद्रमावाहयाम्यहं ॐ त्रातारमि
न्द्रमिति॰ अग्निमीकुमारसरस्वतीश ऋषयइंद्रोदेवतात्रिष्टुप्छंदः इन्द्रावाहनेविनियोगः ।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ हवेहवेसुहवꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ह्व
श यामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः पूर्वे इन्द्र इहागं॰ मेषारूढं सप्तजिह्वं कपिलनी
त्रतेजसं अग्निदूतेति मंत्रेण वह्निमावाहयाम्यहं अग्निं दूतमिति विरूपाक्ष॰ अग्निः॰ गायत्री
छंदः आग्नेय्यां वा॰ ॐ अग्निं दूतं पुरो दधे हव्यवाहमुपब्रुवे देवाँ २ आसादयादिह आग्नेय्यामग्ने इ
हा ॐ यमं महिषमारूढं दण्डपाणिं महाबलं कृष्णार्गं कृष्णा वर्णांगंसुधफलमरं यमाय त्वेति मंत्रेण यममा
वाहयाम्यहं यमाय त्वेति यमो यमावाहने विनि॰ ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा स
विता मध्वानक्तु पृथिव्याः संस्पृशस्पाहि अर्चिरसि शोचिरसि तपोसि दक्षिणे यम इहा॰ सौमं
सौम्यद्युतिं मर्द्दिं शंभुनाधारितं सदा घणारायम सुन्वंतमंत्रेण वाहयाम्यहं ॐ असुन्वंतमिति प्रजा
पतिः निरृतिः॰ त्रिष्टुप् निरृत्यावाहने॰ ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य
अन्यमस्मदिच्छ सा त इत्या नमो देवि निरृते तुभ्यमस्तु नैरृत्यां निरृते इहा॰ वरुणं पाशिनं शान्तं स

५० 50

वें कौ कहिते रितं आवाहयामी त्यंमेतिमंत्रेण सलिलाधिपं इमम्मइतिशुनःशेकः वरुणो • गा
यत्री॰ वरुणावाहने॰ ॐ इमम्मे वरुण श्रुधी हवमद्याचमृडय त्वामवस्युराचके पश्चिमे वरुण
इ: ध्वजहस्तं समंदिव्यं मारुतं शुभलक्षणं वातोवाइति मंत्रेण वायुमावाययाम्यहं वातोवेति
गंधर्वा ऋषयो वातो॰ उष्णिक वायोरावाहने॰ ॐ वातो वा मनो वा गंधर्वाः सप्तविंशतिः ते

ऽग्ने स्वमयुंजंस्तेऽअस्मिन्जवमादधुः वायव्ये वायोरिहा॰ यज्ञनाथं मरोन्नत्तं वीर्यवंतं महा
घिपं कविं दंगेति मंत्रेण चंद्रमावाहयाम्यहं कविदंगइति सुकीर्त्ति ऋषिः सोमदेवता त्रिष्टुप्
सोमावाह॰ ॐ कविरङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय इहेहैषां कृणुहि भोजनानि ये
बर्हिषो नमःऽउक्तिं यजन्ति उत्तरे सोमइहा॰ त्रिलोचनमुमानाथं सत्रिशूलं सदाशिवं त्र्यंबका
मिति मंत्रेण रुद्रमावाहयाम्यहं ॐ त्र्यंबकमिति॰ वसिष्ठ॰ रुद्रो॰ अनुष्टुप् रुद्रावा॰ ह॰ त्र्यंब
कं यजामहे सुगंधिं पुष्टिवर्द्धनम् उर्वारुकमिव बंधनान्मृत्योर्मुक्षीयमामृतात् ईशाने रुद्र

दृहा० हिरण्यगर्भलोकेशं पद्मयोनिं वरप्रदं ब्रह्मज ज्ञानमंत्रेण ब्रह्म आवाहयाम्यहं ॐ ब्रह्मजज्ञानमिति
प्रजापति० ब्रह्मा० त्रिष्टुप्० ब्रह्मावाह० ॐ ब्रह्मजज्ञानं प्रथमं पुरस्तात् द्विसीमतः सुरुचो वेन आवः
स बुध्न्याऽउपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः पूर्वे शमयोर्मध्ये ब्रह्मान्त्रिहा० पन्नगाधि
पतिं देवमनंतं विश्वधारिणं नमोस्तु सर्पमंत्रेणानंतमावाहयाम्यहं नमोस्तु सर्पेभ्य इति प्रजापतिः
सर्पो अनुष्टुप्० अनंतावाह० ॐ नमोसर्पेभ्यो ये के च पृथिवीमनु ये अंतरिक्षे ये दिवि तेभ्यः सर्पे
भ्यो नमः नैर्ऋत्यवारुणयोर्मध्ये अनंत इहागच्छ॥ इति त्वावाहन ॐ मनोजूतिरिति प्रतिष्ठा आपाद
द्या अनंतांताः स्थापिता देवाः सकलशाः सुप्रतिष्ठिता वरदा भवंतु अद्येत्यादि० मम सकलपीडोप
शांत्यर्थं गणपत्याद्यनंतांतानां समस्तदेवानां स्थापितानां सकलशानां पूजनमहं करिष्ये अर्घ्यो पाद्य
ध्यादिभिः पूजनं आपो दूर्वाकुशापाणि दधि चनमस्तं शमीपत्रं तथा पुष्पमपामार्गः मुच्यते तत्र मं
त्राः अपराजेयमे सर्वसुखश्री प्राप्तये मम आपद्विघ्न विनाशाय पशात्र बुद्धि स्तयायु आदित्या द्याप

५१
51

हा सर्वे राहुकेतुपुरःसराः ग्रहदेवाधिदेवांधिदेवैश्च नक्षत्राणां च देवताः इन्द्रादिभिश्च दिक्पा
लैर्ब्रह्मविष्णुमहेश्वरैः वास्तुदुर्गागणेशैश्च क्षेत्रपालेन संयुतैः धन्वंतरिर्दादिव्यैश्च कुलदेव्या
च मातृभिः ऋग्वेदादिचतुर्वेदैः दशौ देवा सांति स्तथा सागरद्वीपपातालीर्नद्वलोकाः सुरैः सह
पर्वता ऋषयः सर्वे गंगाद्याः सरितो धन्वनस्पत्याधिदेवं च पाद्यार्घ्यं वोददाम्यहं स्वागतं वो महा
भागा मम मातृयहकारिकाः इदमर्घ्यमिदं पाद्यं भवद्भिः मतिगृह्यतां सर्वदेवेभ्यो र्घं समर्पयामि एवं
पाद्यं आचमनीयं स्नानीयं पुनराचमनीयं गंधं अक्षतान् पुष्पाणि धूपं दीपं नैवेद्यं आचमनी
यं मुखवासं तांबूलं दक्षिणां नेत्रं नीराजनं मन्त्र प्रदक्षिणां नमस्कारं ततः ॐ स्वाम्मे गणेशश्च त
था ब्रह्मा वै स्वरुद्रियस्तथा क्षारदा क्षेत्रपालश्च शांतिं कुर्वन्तु मे सदा रविश्चन्द्रः कुजः सौम्यो जीवः
शुक्रः शनिस्तथा राहुकेतू ग्रहाः सर्वे सर्वत्रैकादशोस्थिताः ईश्वरश्चोमया सार्द्धं स्कंदो नारायण
स्तथा ब्रह्मा शक्रो यमश्चैवमधिदेवा यथाक्रमं तथा प्रत्यधिदेवाश्च शांतिं कुर्वन्तु मे सदा विनायक

ॐ स्तथा दुर्गा वायुराकी शमश्विनौ अश्विनी भरणी चैव कृत्तिका रोहिणी तथा मृगश्चैवार्द्रायाश्च कृतिः पुष्य
मेवच आश्लेषा च मघा चैव पूर्वाफाल्गुणिका तथा उत्तरा हस्त चित्रं च स्वाती चैव वरमदा विशाखा चानु
राधा च ज्येष्ठा मूलान थैव च पूर्वाषाढो उत्तराषाढा साभिजित् श्रवणस्तथा धनिष्ठा चैव वारुणं पूर्वाभाद्रो
त्तरा तथा रेवती हस्ते यायं वशिष्ठेन प्रकाशितं विष्कुंभः प्रीतिरायुष्मान् सौभाग्यं शोभनस्तथा अतिगं
डः सुकर्मा वृद्धतिः शूलं तथैव च गंडो वृद्धि ध्रुवश्चैव व्याघातो हर्षणस्तथा वज्रं सिद्धि र्व्यतीपातो वरी
या वज्रं सिद्धिर्व्यतीपातो वरीयान् परिघः शिवः सिद्धिः साध्यः शुभः शुक्लोजसैंद्रो वैधृतिः क्रमा
त् ववश्च बालवश्चैव कौलवस्तैतिलस्तथा नरश्च वणिजो विष्टिः शकुनिश्च तथैव च चतुष्पदानागश्च
किंस्तुघ्नः करणानि वै मेषो वृषो मिथुनं कर्कटः सिंह कन्यक तुला च वृश्चिको धन्वी मकरः कुंभ
मीनकौ आगस्त्यश्च ध्रुवश्चैवं तुमेसरा मरीच्याद्या च्यथीश्वराः आपो ध्रुवश्च सोमश्च द्रोणश्चैवा।
निलोनलः मत्स्यश्च प्रभासश्च अष्टौ नवसवस्मृताः एकादशा तथा रुद्रा द्वादशा कीस्तथैव च।

शांतिं कुर्वंतु मे सर्वे विश्वेदेवास्त्रयोदश पितरश्च तथा नागाः ससमुद्राश्च सागराः भूतान्यानश्च ऋषयस्तथैव
च सप्त मेघाश्च ताराराव च योगिन्यश्च चतुःषष्टिर्मातरः सप्त चैव हि पातालाद्याः सप्तलोकाः भूराद्याः स
प्त चैव हि नद्यस्तथा पर्वताश्च गरुत्मान् रुद्र एकादशाश्च चंडिका क्षेत्रपालश्च शांतिं कुर्वंतु मे सदा इंद्रो व
ह्निर्यमश्चैव नैरृतो वरुणो मरुत् कुबेर ईशो ब्रह्मा चानंतः कुर्वंतु शांतिकं आयुर्विद्यां बलं रत्नं यशः
शौर्यं च पुष्कलं पुत्रान् रत्नधनं रत्नं यशः शौर्यं च पुष्कलं पुत्रान् रत्नधनं रत्नं यशः शौर्यं च पुष्कलं पुत्रा
न् रत्नं सर्वान्कामांश्च देहि मे इति प्रार्थ्य अनेन पूजनेन सर्वदेवानां पूजनं यत्कृतं तेन नारायण
स्याधनं तेन ताः सर्वे देवाः प्रीयंताम् इति संस्मरेत् स्थापनपूजनविधेः सर्वं परिपूर्णमस्तु इति सर्वदेव
ता पूजनं अथ होमः तत्र संकल्पः ॐ नमः परमात्मने श्री पुराणपुरुषोत्तमाय नत्सदद्य ब्रह्मणो
द्वितीयपरार्द्धे श्वेतवाराहकल्पे वैवस्वतमन्वंतरे ऽष्टाविंशतितमे युगे कलौ युगे कलिप्रथमचरणे जंबू
द्वीपे भरतखंडे आर्यावर्तांतर्गत ब्रह्मावर्तैकदेशे श्री मथुरामंडले श्री आदिवाराहक्षेत्रे स्वरक्षेत्रे श्रीके

शवादिनामसति अमुकनाम्निसंवत्सरेऽमुकायनेऽमुकऋतौ अमुकमासेऽमुकपक्षेऽमुकराशि
स्थितेश्रीसूर्येऽमुकराशिस्थितेसेषायथाराशिस्थितेषुएवमादिविशेषणविशिष्टेयाममुक
तिथौअमुकवासरोन्वितायांयथानामनक्षत्रयोग करणमुहूर्त्तान्वितायांश्रुतिस्मृतिपुराणो
क्तफलप्राप्तिकामस्यास्ययजमानस्यसपुत्रकलत्रादिपरिवारस्यारोग्यधनधान्यपशुसमृद्ध्य
र्थंसकलकल्मषनाशार्थंदुष्टग्रहादुष्टअरिष्टपरिहारार्थंनवग्रहमखेगणाधिपत्यादिसमस्तलोकपा
लेभ्यआदित्यादिनवग्रहेभ्यदेवताधिदेवताप्रत्यधिदेवतापंचभूतात्मरुद्रादिकपालेभ्योवास्तुमंडलदे
वताभ्यःसकलविदितसंस्कृतोपढौकिततिलादिव्रीहिगव्याज्याकौदिसमिद्दधिमधुनालिकेरपूगी
फलादिनाद्रव्यसमाहारहोमेविनियोगः अथहोमार्थंनवग्रहाणांसमिद्ध्यकार्थाः कथ्यन्ते अर्कः।
पलाशखदिरापामार्गोऽथपिप्पलःउदुंबरःशमीदूर्वाःकुशाश्चसमिधःक्रमात् अलाभेर्वमकर्त्तव्याः
सर्वाःपालाशवतज्ञाःद्याओषधीतिमंत्रेणासमिधश्चसमाहरेत् ॐयाओषधीःपूर्वाजातादे
वेभ्यस्त्रियुगंपुरा मनैनुबभ्रूणामहंशतंधामानिसप्तच इतिमंत्रेणौषधीसमाहरेत् कृत्स्नांस्पृ।

सां तथा न्यूनां दीर्घां शीर्णां वपाटितां कीटविद्धां तथा रूक्षां काकविष्टावलिप्तकां ऊर्द्ध्वशुष्कां तथा
हीनां वर्जयेद्दिरलान्वितां अष्टोत्तरशतीसंख्या ग्रहैकैकस्याहते मता अष्टाविंशतिरष्टौ वा चैका
प्रोक्ता यावत्सारतः होतव्यं मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युता अभेऽत्राः प्राक् समिद्देयाः समंत्रानुस
माहुतिः गुडोदनं वा पायसं चरुहविष्यं क्षीरसाष्टिकं दध्योदनं हविः चूर्णमांसं चित्रान्नं च ग्रहेभ्यं ग्रहक्र
मादेतद्द्विजेभ्यो भोजनं बुधैः शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं अथ ख्यापि नां दक्षिणाः
धेनुः शंखस्तथानड्वान्पीतवासो हयः क्रमात् कृष्णा गौरायसं छागं एता वै दक्षिणाः एतास्त
मात्सर्यमंत्रीयपल्लिशाद्धके — लत्तको कथ्यते होमे ह्यात्रिंशद्वलता मताः अतो गर्धिके वान्य
नंवा कुर्वन्नापरमाप्नुयात नवा नवहास्तथा पूज्याः क्रमाद्देवाधिदेवताः यस्य यस्य हि दुष्टः स
तं बलेन यत्नयेत् नं चार्ण्णा स्वर्भागेनापु द्द पाठे नवा ग्रहाः पूजा हीनं विधिं विनग्रहाः स्मुरपदाभिता
एकस्यै कावहोतव्याधमिधापच नसहगुना दध्ना वा मधुना ग्रकान्तनम्यत्कामवता हुतिः ए
कामन्याहुतिं दद्यात् परपरास्त्र छत्तोसिलैः सहदेवपठे मंत्रं होमो व्याहृतिभिः स्मृतः अथ प

५३

53

वे मंत्रं होमो व्याहृतिभिः स्मृतः अथ परिमाणं घृतस्य कार्षिको होमः क्षीरस्य मधुनस्तथा शुक्तिमात्रा
ड्डहुतिर्दध्नः पयसः पायसस्य चपण्यानां सर्वमस्यानां लाजानां मुष्टिसंमता खंडत्रयेण मूलानां फला
नां फलानां स्वप्रमाणतः ग्रासार्द्धमात्रमन्नं तु गुग्गुलं बदराकृतिं अंगुष्ठाग्रपर्वमात्रं तु इन्द्रपारि स्तंदं डकं ८
नागवल्लीदलं स्वर्णलता नाम उलद्वयं पत्रं पुष्पं समानं तु समिधं तु दशांगुलं करानामष्टमं भागं जुहुयाद्
धि पूर्वकं अथ कुंडमानं कोटिहोमे चतुर्हस्तं लक्षहोमे तदर्द्धकं अयुते चैतदर्द्धं च हस्तमात्रं तु कारयेत् ॥
आचार्यं हृतमाकृय कुलीनं वेदपारगं ऋत्विजो द्वे च चतुरो द्वौ वाप्येकं तु कारयेत् गायत्र्या दशसाहस्रं
मानस्तोके त्रिपद् तथा कुर्यादिति कृपाः पंचत्कानामथ षोडशः द्वात्रिंशद्धमं त्रैस्तु चत्वारे विसु
दैवताग्निर्योमंत्रेण होतव्यं सहस्राणि दशैकं तु दुर्गामंत्रेण होतव्याः सहस्राणि चतुर्दशः शेषान्यं च
दशाहुत्या आहुतिभिं दैवतां लक्ष्याऽयुतादिहोमेषु होवरव विधिः स्मृतः अयुतहोमादिकं कुर्याद्धवा
रयाञ्च तु हयं समिदाज्यं वा रम्भान्न तिलान् सोऽहं ब्रह्मरधिं ब्रह्मस्यंध धूपं नयादीपं नैवेद्यं च समर्पयेत् पंचा

घृतं दधिमधु शर्करा च पयोदनं तंडुलाश्चैव होमार्थे न तु विष्णोः समर्चने इत्तो विकारं
त्वा नायविष्णो हैमावर्जयेत् मावर्जयेत्
गुरुणा० इदं गणपतये एवं सर्वग्रहस्य० विष्णो० नमः ग्रीष्म० पंच० विष्णु सूर्यादीनां संकल्पा
त्ववंते ॐ आकृष्णेनेति हिरण्यस्तूप ऋषिः सविता देवता। त्रिष्टुप् छंदः आदित्य प्रीतये क
पिलाग्नौ आज्यादि होमेऽर्कसमिद्धोमे विनियोगः ॐ आकृष्णेनः स्वाहा इति समीप ॐ इदमरेवा
इति वरुण० सोमोदे त्रिष्टुप् सोमप्रीतये पिंगलाग्नो आज्यादि होमे पलाशसमिद्धोमे वि० ॐ
इमं दे० इदं चंद्राय ॐ अग्निर्मूर्द्धेति विरूपाक्ष। अंगारको० गायत्री० अंगारकप्रीतये धूमके
त्वग्नावाज्यादि होमे खदिरसमिद्धोमे वि० ॐ अग्निर्मू० इदं भौमाय ॐ उद्बुध्यस्वेति० परमेष्ठी० बुधो०
त्रिष्टुप्० बुधप्रीतये जठराग्नावाज्यादि होमे अपामार्गसमिद्धोमे० ॐ उद्बुध्यस्वा० इदं बुधाय ॐ बृहस्
पते इति गृत्समदः० बृहस्पतिः० त्रिष्टुप् बृहस्पतिप्रीतये शिखिनामाग्ना

५४
54

वाज्यादिहोमे॰ प्लक्ष समिद्धोमे विनियोगः ॐ बृहस्पते अ॰ ॥ इदं बृहस्पतये अत्रान्तरिक्षत इति शुक्रो॰
अभि जगती छंदः शुक्र प्रीतये दारकाम्नावाज्यादिहोमे उदुंबरसमिद्धोमे विनि॰ ॐ अत्रान्तरिक्ष वो॰ इदं
शुक्रा य ॐ शन्नोदेवीरिति दध्याङ्ङाथर्वण ऋषिः शनैश्चरो देवता गायत्री छंदः शनैश्चरप्रीतये मद्यातेजो॰
ताज्यादिहोमे दूर्वासमिद्धोमे विनियोः ॐ शन्नो देवी॰ इदं शनैश्चराय इ॰ इ कया न श्चित्रा इति वामदे
व॰ राहुर्देव॰ गायत्री॰ राहुप्रीतये हुताशनाग्नो आज्यादिहोमे दूर्वासमिद्धोमे वि॰ ॐ कया न श्चित्रा आ॰
आभुवत्॰ इदं राहवे केतुं कृण्वन्निति मधुछंदा॰ केतुर्देव॰ गायत्री छं॰ केतुप्रीहतये पयाएवन्न
के॰ इदं केतुभ्यः इति नवग्रहहोममंत्राः ॐ अंबकं ॥ इदं त्र्यंबकाय श्री अध्यते॰ इदं मेध्ये ॐ यत्र कं द
इदं स्कं दाय ॐ विष्णोरराट इदं विष्णवे ॐ॰ आ ब्रह्मन्॰ इ ब्रह्मणे उ सजोषा॰ इदं ब्रह्मणो इंद्राय ॐ यमा
यत्वा॰ इदं यमाय ॐ काण्डिरसि॰ इदं कालाय ॐ चित्रावसो इदं चित्रगुप्ताय इति देवता होमः ॐ सनः
पितेव॰ इदं अग्नये ॐ आपो अद्या॰ इदमद्भ्यः ॐ विदरसि॰ इदं पृथिव्यै ॐ इदं विष्णु॰ इदं विष्णवे ॐ इदं

५५
55

आसत्वेता॰ इदं सिंद्राय ॐ इंद्रं दैवी॰ इदं सिंद्राण्यै ॐ प्रजापते॰ इदं प्रजापतये ॐ नमोऽस्तु सर्पेभ्यः इदं सर्पे
भ्यः ॐ ब्रह्मजज्ञानं इदं ब्रह्मणे इत्यधिदेवताहोमः आ नो भद्रा॰ इदं अनंताय ॐ देवानां भद्रा॰ इदं वासु
कये ॐ तान्पूर्वया नि॰ इदं तक्षकाय ॐ तन्नो वाते इदं कर्कोटकाय ॐ तमीशानं॰ इदं पद्माय ॐ स्वस्ति न
इन्द्रो वृ॰ इदं महापद्माय ॐ एष वद्म्व मि रुतः इदं शंखपाय ॐ भद्रं कर्णेभिः॰ इदं कंबलाय ॐ शंतमित्रः श
रहो॰ इदं कुलिकाय इत्यधिदेवताहोमः ॐ गणानां त्वा गणपतिं॰ इदं गणेशाय ॐ जातवेदसे सुनवा
म॰ इदं दुर्गायै ॐ वायो ये ते सहस्र॰ इदं वायवे ॐ घृतं घृतपावान॰ इदमाकाशाय॰ ॐ या वां कशा मधु॰
इदमश्विनी कुमाराभ्यां इति पंच लोकहोमः ॐ अश्विना तेजसा चक्षुः प्राण इदं अश्विन्यै ११ ॐ यमाय त्वा॰
इति भरण्यै २ ॐ अयमग्निः सहस्रिणो॰ इदं कृत्तिकायै ३ ॐ ब्रह्मजज्ञानं प्र॰ इदं रोहिण्यै ४ ॐ सोमो धे
नुं सोमो॰ इदं मृगशिरायै ॐ नमस्ते रुद्र मन्य॰ इदमार्द्रायै ६ ॐ अदितिर्द्यौरदितिः॰ इदं पुनर्वसवे ७
७ ॐ बृहस्पते परि दीया इदं पुष्याय ८ ॐ नमोऽस्तु सर्वेभ्यो ये॰ इदमाश्लेषायै ९ ॐ पितृभ्यः॰ इदं मघा

यो १० ॐ भग प्रणेतः इदं पूर्वाफाल्गुन्यै ११ ॐ देवा आवधिष्युं० इदं मुत्तराफाल्गुन्यै १२ ॐ विभ्राड् ३० इदं ह
स्ताय १२ इदं चित्रायै १४ ॐ पीवो अन्ने रेवा इदं स्वात्यै १५ ॐ इन्द्राग्नी इदं विशाखायै १६ ॐ नमो मित्रे० इदं
मनुराधायै १७ ॐ सं इन्द्र बृहस्ते इदं ज्येष्ठायै १८ ॐ मातेव पुत्रं इदं मूलाय १९ ॐ मपा धमत् इदं पूर्वाषाढायै २०
ॐ विश्वे अद्य० इदं मुत्तराषाढायै २१ ॐ तत्सवितुर्वरेण्यं इदं मभिजिते ३२ ॐ विष्णोरराटं इदं श्रवणा
य २३ ॐ वसोः पवित्रमसि इदं धनिष्ठायै २४ ॐ वरुणस्योत्तम्भम इदं शतभिषायै २५ ॐ उत नोऽहिर्बु०
इदं पूर्वाभाद्रपदायै २६ ॐ शिवो नामासि इदं मुत्तराभाद्रपदायै २७ ॐ पूषन्तव व्रते० इदं रेवत्यै २८ इ
ति नक्षत्रहोमः ॐ योगे योगे तवस्तरं० इदं विष्कंभाद्यष्टाविंशतियोगेभ्यः ॐ भद्रं कर्णेभिः शृणु० इदं क
रणेभ्यः ॐ अग्निर्विर्षो यो ऽस्ति इदं मेषादिराशिभ्यः ॐ इन्द्रस्य क्रोड० इदं मगस्त्याय ॐ ध्रुवोसि ध्रुवो
ऽयं यज० इदं ध्रुवाय ॐ सप्तर्षय इदं सप्तर्षिभ्यः ॐ वसुभ्यस्त्वा रुद्रेभ्यस्त्वा इदं वसुभ्यः ॐ रुद्राभ्यस्त्वा०
इदं रुद्रेभ्यः ॐ सविता प्रथमेहन्नग्नि० इदं मादित्येभ्यः ॐ विश्वे देवा अश्वं इदं विश्वेदेवेभ्यः ॥ ॐ पितृभ्यः

स्वधापितृभ्यः स्वधा॰ इदं पितृभ्यः ॐ नमोस्तु सर्वेभ्यः॰ इदं नागेभ्यः ॐ समुद्राय त्वा वाताय स्वाहा॰ इदं समु
द्रेभ्यः ॐ ये भूतानामधिपतयः॰ इदं पंचभूतात्मभ्यः ॐ वसंताय कपिंजलानालभ॰ इदं मरुद्भ्यः ॐ वाता
य स्वाहा॰ इदं मेघेभ्यः इदं चतुःषष्टियोगिनीभ्यः ॐ यो वः शिवतमो र
सः॰ इदं ब्रह्मादिसप्तमातृभ्यः ॐ युंजानः॰ इदं जंबूद्वीपाय ॐ शां दद्भिः॰ इदं शाकद्वीपाय ॐ इषे
त्वोर्जे त्वा॰ इदं कुशद्वीपाय ॐ कस्त्वा सत्व॰ इदं क्रौंचद्वीपाय ॐ समिधाग्निं इदं शाल्मलिद्वीपाय
ॐ गोमेधं॰ इदं प्लक्षद्वीपाय ॐ मयि गृह्णामि॰ इदं पुष्करद्वीपाय इति सप्तद्वीपहोमः॥ ॐ यमाय त्वा॰
इदं पातालाय ॐ अपो देवा॰ इदं रसातलाय ॐ ध्रुवक्षिति॰ इदं तलातलाय ॐ सुसमिद्धाय॰ इदं महातला
य ॐ अग्ने नय॰ इदं सुतलाय ॐ पयः पृथिव्यां इदं वितलाय ॐ कस्त्वा॰ इदं अतलाय इदमधोलोके
भ्यो होमः ॐ अग्निमूर्द्धा॰ इदं भूर्लोकाय ॐ अदित्यै रास्नासि॰ इदं भुवर्लोकाय ॐ प्रपो दिवि॰
इदं स्वर्लोकाय ॐ समिद्धोग्निः॰ इदं महर्लोकाय ॐ यो नः पिता॥ इदं जनलोकाय ॐ तपस्य॰ इदं

तपोलोकाय ॐ अयंगो० इदं सत्यलोकाय इदं भूर्भु सप्तलोकहोमः ॐ पंच नद्यः सरस्व० इदं नदीभ्यः
ॐ प्र पर्वतस्य वृषभस्य० इदं पर्वतेभ्यः ॐ न वो यस्ते ह्यग्नि० इदं देवते ॐ सुपर्णोसि० इदं गरुडाय अ
संख्याता सह० इदं कलशस्य रुद्राय ॐ सहस्रशीर्षा० इति कलशस्य विष्णवे ॐ प्रजापते न त्व०
इदं कलशस्य प्रजापतये ॐ जातवेदसे० इदं दुर्गायै ॐ नमोस्तु सर्पेभ्यः० इदं क्षेत्रपालाय ॐ भूताय
त्वा० इदं भूतेभ्यः ॐ विश्वकर्मन्ह० इदं विश्वकर्मणे ॐ अग्निमीळे पुरोहितं इदमृग्वेदाय ॐ इषेत्वोर्जे
त्वा० इदं यजुर्वेदाय ॐ अग्न आयाहि वीतये० इदं सामवेदाय ॐ शन्नो देवीरभिष्टय० इदमथर्ववणवे
दाय अथ दशदिक्पालहोमः ॐ त्रातारमिंद्र० इदमिंद्राय ॐ अग्निं दूतं पुरो दधे इदमग्नये ॐ यमा
यत्वा इदं यमाय ॐ असुन्वंत० इदं निर्ऋतये ॐ इमम्मे वरुण इदं वरुणाय ॐ वा नो वा मनो० इदं वायवे
ॐ कुविदंग० इदं सोमाय ॐ अवकं० इदमीशानाय ॐ ब्रह्म जज्ञानं० इदं ब्रह्मणे ॐ नमोस्तु सर्पे-
भ्यो० इदमनंताय इति दशदिक्पालहोमः ॐ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतम्म

५७

57

ऽआसन् अर्घ्यं स्थिरं धातृरजसां स्थिमा नो जस्मो घर्मो ह विरस्मि नाम १ इदमग्नये ॐजातवेदसे स्तु:
तुवाम सोमम रातीयतो निदहाति वेदः बर्षदति दुर्गाणि विश्वा नावा सन्धु दुरिता त्यग्निः इदमग्न
ये. एवं होमं समाप्य यास्मै इष्टदेवतास्तत्स्याः प्रीतये होमं कुर्यात् तन्मन्त्रेण ह जपपूर्वकं होममा
त्रं एवौक्तं कृत्वा पंचाज्जपस्य दशांशो होमः कर्तव्यः इति संप्रदायः तत्राज्ज्यादन्यद्व्यं शेषेणा स्वि
ष्ट कृतं हुत्वा पुनराज्जेन भूर्भुवः स्वः ॐ त्वन्नः आयायाश्च अग्ने यते शतं उदुत्तम प्रजापतये स्वाहेति जुहु
यात् अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते ततः आज्ज्यावलोकनं ॐ तेजोसि शुक्रमस्य
मृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि आज्ये नस्व मुखं दृष्ट्वा आज्जंपा
पहरं परं आज्जं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितं इतिमंत्राभ्यामाज्ये स्वमुखदर्शनं कुर्याद्य
जमानः ॥ अनेन होमेन गणपत्यादि अनन्तास्ता देवाः प्रीयन्तां तु इति संकल्प्य समिद्धोमः आ
ज्यहोमः चरुहोमः तिलहोमः द्राक्षादिफलहोमः त्र्यंबकमंत्रेण गुग्गुलहोमः श्रीसूक्ते

नलक्ष्मीहोमः नवाहुति होमः इति होमः अथ बलिदानमहं करिष्ये तत्र दधिमाषगुडपायससात्रे
णोऽधूमा त्रैर्बलिं दद्यात् तद्यथा गणपतये नमः गणतत्रे पाद्यं गंधं पुष्पाय र्चनं आगच्छ देव गणनाा
यक यज्ञनायक त्वाधिकार भुवनाखिलमंगलाहो सिंदूरशोणशुभगात्र समाश्रितालिपंक्ते बलिंम
मगृहाण नमो गणेभ्यः ॐ गणानां त्वेति मंत्रेण बलिं दद्यात् क्षेत्रेशितु रूपादिकं बलिदाने विनियोग
इति विशेषः गणानां त्वेति पाठोपि सर्ववत् सांगाय सपरिवाराय सायुधाय गणपतये इमं दधिमाषादिकं
बलिं समर्पयामि भो भो गणपते इमं दधिमाषादिकं बलिं भक्तदीपं पक्ष्मांसकुट्टं च सपरिवारं रक्षायुःक
र्ता दत्ते मम कर्तो शांतिकर्तो तुष्टिकर्तो पुष्टिकर्तो भव इति गणेशाय बलिं दद्यात् एवं सांगाय सपरि
वाराय स्यात् पुष्टिकर्ता भवेत्यंतं सर्वेषां बलिदाने पठनीयं यद्येहि देवाधिप ब्रह्मसूत्रे पितामहस्त्वं चपवि
त्रमूर्तिः ध्यानास्थितस्तु अत्र वे त्वं इमं बलिं रक्षा वसुर्मुखवत्तं ब्रह्मयज्ञानमंत्रेण बलिं दद्यात् ब्र
ब्रह्मणे ॐ ब्रह्मयज्ञानं प्रः सांगाः ब्रह्मणे· भो ब्रह्मन् त्वमिमं· एह्येहि नारायण चक्रपाणे लक्ष्मीप्रियो दे

स्य विनाशनस्तुरखगोत्रस्य: खंजवै: सम्मैतोजनार्द्दनसर्वं भर्गवक्त्रमस्ते विलोररट मंत्रेणबलिंग्रहा
जगत्यतेर्ज्ञविष्णोर॰ सांगाविष्णवे॰ भो विष्णो इमद॰ ह्येह्यहो शंकर सूलपाणो गंगाधरो नीलेगलोव्य
स्य: उमापतिर्भस्मशरीरल्लिसइमंबलिंग्रह्ण सराश्चिवत्वे नम: शिवायमंत्रेणबलिंदद्यात्कपर्द्दिने ॐ
नम: शिवाय॰ सांगाय॰ शिवाय॰ भो सदाशिव॰ एह्येहि भो लक्ष्मि हरिप्रियात्वं वक्षस्थलेवासिज
नार्द्दनस्य पद्मासने सिंधुसमुद्भवे त्वमिवंबलिंग्रह्ण सर्वेबमातः ॐ श्वतेसु मंत्रेणबलिंदद्यात् श्रियेन
या ॐश्रीश्चते॰ सांगायै सपरिवारायै॰ लक्ष्म्यै भो लक्ष्मि इमं रुधिमा॰ एह्येह्यहो देवि सरस्वति त्वं विरं
चिपुत्री सर्वविद्याप्रयासने पुस्तकधारिणि त्वं मामत्रुग्रहा॥ श्व बलिंचपूजां पंचधनवः स
मंत्रेण बलिंदद्याज्जगहिरे ॐ पंचनद्य: स॰ सांगायै स॰ सरस्वत्यै॰ भो सरस्वति इमंद॰ एह्येहि देवत्रा
धिपप्रभमत्तैवकुन्तःस्वतुः बहिस्सुयोगिनीभि: महाबलपराक्रमलंशांतमनै श्चागत्य गृहाणोचबलिंच
पूजां विश्वतस्त्रुत॰ सांगायस॰ तेऽम्या लाय॰ भो देवपाल इमं र॰ इमम लोकपालेभ्यो बलिंदा

'नं अयनगतहेम्यः रात्रेहि मार्त्तण्ड सहस्ररश्मे निशातमोरेणगतां प्रकाश अवबोधमन्वालि खिललोक
बोध आर्कस्म मंत्रेण वलिं गृहाण ॐ आर्कस्येन· सांगाय० सूर्याय नमो सूर्य इमं० एहेहि तारागण
नाथ सोम एपी एवर श्मे शिवमौलिरत्ने वलिं त्विमं देवसुमंत्रपूज्य कुमुद्वतीकांतग० हारण एजो
इमं देवा० सांग० चंद्राय० नमो चंद्र इमं द० रक्तकायसमागच्छ विद्युत्पिंगललोचन अग्नि मं दैत्तिमं
त्रेण वलिं ग० ह्लीं स्वम् मिजन ॐ अग्निर्मूर्द्धा० सांग० भौमाय० भौमो भौम इमं· बुधाय छ महादीप्ते
सर्वसौम्य गुणालय उद्बुध्यस्वेति मंत्रेणार्व लिं ग० ह्लीं घ चंद्र न ॐ उद्बुध्यस्व· सांग० मम· बुधा
य० इमं· नमो बुध इमं० एहि वाचस्पते पूर्वदेवानां हेमसन्निभ बृहस्पते शुभं मंत्रेण वलिं ग० ह्लीं घ
बुद्धिर ॐ बृहस्पतेति० सांगाय० मम· बृहस्पतये इमं दधि० एहि दैत्यगुरो विद्याधर त्वं कुंद हिम
घसे अत्रात्परिस्मृत इति वलिं ग० ह्लीं घमावंगव ॐ अत्रात्परिस्मृतो रसं० सांमाय० मम० शुक्रा
य· नमो शुक्र इमं द० छायागर्भसमुद्भूत कज्जलाभ महानेश्वरः एहि सन्त्रः सुमंत्रेण व लीं ग० ह्लीं

ख्सूर्यंज ईशओरेवी॰ सांगा॰ सप॰ ईशानाय॰ ओं ईशानेइमंर सौं ह्रिं के यसमागच्छ चंद्रादित्यत्यमम
ईं नकेयान स्थित्रा मंत्रेणाबलिग्र ह्लीं स्वधमूकर्ड कयानस्थित्रा॰ सोमा॰ सपराहवे॰ ओं राहोइमं
र॰ सहस्रमूर्त्तेणरात्रके ओं दीर्घा कृतेग्रहकेतुः कृत्वन्स्तु मंत्रेण बलिं ग्र ह्लीं स्व ब्रसज ईके तुं कृ
णवनू सांगा॰ सपकेतवे॰ ॥ ओं केतो॥ इमं र॰ इतिनवग्रहेभ्यः अथ दिक्पालबलिः इन्द्रं सहस्र
नयनमागच्छ अमुवज्रभृत् वाहननसजोषाइं इ मंत्रेणबलिं ग्र ह्लीं सदेवराट् ई सजोषाइंद्र॰ सांगा
यसप॰ इंद्राय इमंदग्धिमा॰ समर्पयामि ओं इन्द्र इमं छिज एहि समागच्छ ज्वालाशोभितवह्निग्रह अ
ग्निरश्मीति मंत्रेण बलिं ग्र ह्लीं स्वपसघ्न ई अग्निरश्मि॰ सांमा॰ सपरिवा॰ अग्नये इमं॰ ओं
अग्ने इमंर॰ कृतांतमहिषारूढ दंडहस्त भयानक यमायत्वेति मंत्रेणाग्र ह्लीं स्वपसघ्न ई अ
ग्निरश्मि॰ सांगा॰ सपरिवा॰ अग्नये इमं॰ ओं अग्ने इमंर॰ कृतांतमहिषारूढ दंडहस्त भ
यानक यमाय त्वेति मंत्रेणाग्र ह्लीं स्वपसघ्न ई अग्निरश्मि॰ सांगा॰ सपरिवा॰ अग्नये इमं॰

मो अग्नेइदंमंर० कृतांजलिमहिषारूढ दंडहस्तभयानकयमायत्वेतिमंत्रेण गृहाण बलि दक्षिणादिक्पाते
ऽयमायत्वा० सांगा० सप० ऽयमाय० मो यम इदं मंर० रक्तनेत्रसमारूढो नैरृत्यां राक्षसेश्वर असुन्व

६ न्तः सुमंत्रेण बलिं गृहाण ह्ली घ्वयद्यत्य असुन्वन्त० सांगाय० सप० निर्ऋतये इदं मंर एहि कुंदेंदुधवलपाशपा
णे जलाधिप वरुणस्येतिमंत्रेण बलिं गृहाण ह्ली घ्वमेमरुत ऽवरुणस्यो० सांगाय० सप० आपीन
हरितच्छायमारणभृतः शरीरिणां वायो ये ते सुमंत्रेण बलिं गृहाण घ्व मे मरुत ऽवायो ते सह० सां
गाय० सप० वायवे इदं मं० समर्प० मो वायो इदं मंर्द्धि० स्वर्णच्छायगराहस्तरत्नोहिंपितखिन्नह कुवि
ऽरंगेति मंत्रेणावलिं गृहाण ह्ली घ्वविन्नम ऽकुविरंग० सांगा० सप० कुवेराय इदं मं० मो कुवेर इदं मंर म
स्मांगरवद्धांगकपालधारि रिंकामायनीकांत वृषाधिरूढ आगच्छ पश्चे जगरेकनाथेशा
वास्यमंत्रेणावलिं गृहाण ऽईशावास्यमिदं सर्वं यत्किंचि ज्जगत्यां जगत्‌ तेन त्यक्तेन भुंजीथा मागृ
ध सांगा० सप० ईशानाय इदं मं मो ईशान इदं मंर० पद्मयोने चतुर्वक्त्र समेहि कमलास

२१

६० 60

न च्या ग्राखण्तितिमंत्रेण वलिं ग्ह्लीं ष्वमेनंधे ॐ आव्रष्यनृ॰ सांगा॰ सप॰ व्रह्मणे॰ मो व्रह्मनिर्मं॰ अ
नंतकुंडरी का कहक॰ लाम लविभूषित नमोस्तु सर्वेभ्य इति वलिं ग्ह्लीं ष्वनागराइ ॐ नमोस्तु सेभ्यो॰
सांगाः स॰ सप॰ अनंताय इ॰ मो अनंत इमं र॰ इति रक्षादिकपालेभ्यः वो विश्वंभरे समागच्छ कर्मे रक्ष निवा
सिनि अयं गोरितिमंत्रेण वलिं ग्ह्लीं ष्वमे धूरे अयंगो॰ सांगायै सपरिवारायै पृथिव्यै इ॰ मं॰ सम॰
मो पृथिवि इमं वास्तु देव समागच्छ ब्रह्मपुत्र नमोस्तु ते नमो वास्तायमंत्रेण वलिं ग्ह्लीं ष्व पत्तय ॐ नमो॰
वास्ताय चं चरव्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारु
णाय च सांगा॰ सप॰ वास्तुदेवाइ॰ मो वास्तुदेवः इ ध नमो रूपीठायोगि नमस्तु ते षष्टि नंद सुरवाः योगि
योने समागत्य पञ्चेणृ ह्लं तुमे वलिं ॐ योगे योन॰ सांगाभ्यः सपरिवाराभ्यो योगिनीभ्य इ॰ मो योगि नम॰
॰ ब्रह्मपुत्रि समागच्छ हंसयाने सरस्वति पंचनद्यः सुमंत्रेण वलिं ग्ह्लीं ष्वमेमरवे सांगायै॰ सप
रिवारायै सरस्वत्यै इ॰ मो सरस्वति इ॰ कुंभयोने समागच्छ मेघनीरविंबाप ह इ नूस्य कोऽ मंत्रेण गह्ले

गृह्णीष्वमेवलिंसांगाय सप॰ अगस्तये इ॰ मोऽगस्त्य॰ येन कौमार ब्रह्मचारि विष्णुमाराध्य मुक्तिरेवलिः प्रवासि
गृह्णातु सोऽस्तु मामसपरो महान् ॐ ध्रुवो॰ सिद्धवो॰ सांगा॰ सप॰ ध्रुवायेम॰ भो ध्रुव इदं मंत्र॰ अश्विन्यादी
नि गृह्णन्तु नक्षत्राणि बलिं मम सांगेभ्यः सपरिवारिवारिभ्यो नक्षत्रेभ्य इदं मं॰ भो नक्षत्राणि इ॰ मंत्र ध्या
त्विकं बलिं मत्संदत्तं पंचषष्ठ्यं नमो सुकृतं वं सपरिवारं रक्षन्तु आयुः कर्त्तारः क्षेमकर्त्तारः शान्तिकर्त्तार
स्तुष्टिकर्त्तारः पुष्टिकर्त्तारो भवन्तु इ॰ नेवहु वचने प्रयोगः योगे योगे नु गृह्णन्तु योगा॰ विष्कंभकादयः
ॐ योगेयोगे॰ सांगेभ्यः सपयोगेभ्य इदं मं॰ इ भो योगा इ॰ मंत्र॰ गृह्णन्तु राशयः सर्वे त्वधिनैर्ति बलिं मम ॐ अ
श्विनी॰ ॐ सांगेभ्य॰ सप॰ राशिभ्य इदं मं॰ भो राशय इ॰ मंत्र॰ वसंताय इति गृह्णातु वसंताद्य ऋतुर्वो बलिं ॐ वसं
ताय॰ सांगेभ्य॰ सप॰ वसंतादय ऋतव इदं मं॰ स सर्वपः सगृह्णन्तु वसंताद्य ऋतुर्वो बलिं ॐ वसंताय॰
सांगेभ्य॰ सप॰ वसंतादय ऋतव इ॰ कामो ऋतव इदं मं॰ स सर्वपः सग॰ गृह्णन्तु बलिं सम षीयो मम ॐ सम
र्थपः मति॥ सांगेभ्यः सम॰ ऋषिभ्य इदं मंत्र॰ भो ऋषयः इदं मंत्र॰ वसुमस्त्वेक्ति मंत्रे वसवो ह्येवो बलिं मम ॐ

६१ 61

वसुभ्यस्त्वा॰ सांगेभ्यः सप॰ विश्वेभ्यइ॰ भ्यो विश्वेदेवाइ॰ पितृभ्यःस्वेतिपितरेयज्ञे न ग हं तु मे वलिं ॐ
पितृभ्यः स्वधा॰ सांगेभ्यः सप॰ सप्तसमुद्रेभ्यइ॰ भ्यो सप्तसागराइ॰ वाना यस्वाहेति वलिं मे घा ग हं तु मे
मखे ॐ वातायस्वाहा॰ सांगेभ्यः सप॰ मेघेभ्यइमं॰ भ्यो मेघाः इमं॰ पयेप ध्यासनासीने विश्वो वसत्स्वला
स्वये पञ्चनामसंस्यूने वलिं ग ह्णी ष्वश्रीश्वते ॐ श्रीश्वते॰ सांगायैसप॰ लक्ष्म्यैइमं॰ भ्यो लक्ष्मिइमं द॰
ग. हाणरेवरे वेशनैवेद्यं ममसाधव विश्वोररार मंत्रेण वाग्ररस्तमसानघ ॐ विश्वोरराटमसि॰ सांगा
य॰ सप॰ विश्ववेइ॰ भ्यो विश्वोइ॰ क्षेत्रपालसमागच्छ नगरस्सर्वोप्य रास्पद सचस्पस्वेति मंत्रेण वलि
ग ह्णी ष्वयागयसप॰ क्षेत्रपालायइ॰ क्षेत्रपालायवतुर्मुखंरीपंदद्यात् ॐ अग्निकोणे द्वजनं नम
मं ॐ हिंकारायस्वाहा हिंकृते स्वाहा ॐ कं रने स्वाहा ॐ कंद्रमानाय स्वाहा ॐ प्रोथैन स्वाहा प्रोथमानायस्वा
हा ॐ गंधायस्वाहा धूलायस्वाहा निविष्टायस्वाहा ॐ उपविष्टायस्वाहा संदितायस्वाहा वल्गाते स्वाहा सी
नायस्वाहा शयानायस्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धायस्वाहा ॐ भमाराणाय

स्वाहाविभ्रन्तायस्वाहासर्वंसनायस्वाहाहोपयितायस्वाहायानायस्वाहाप्राणायस्वाहा ओं क्षेत्रपाल

इमं दधिमाषादिकं बलिं भक्षतुः कर्त्ता क्षेमकर्त्ता शांतिकर्त्ता तुष्टिकर्त्ता भव फरकलितकपालह्

ति॰पाठः इति सर्वेषां बलिदानं ततः आसनेत्रुपविस्य आवाहनपुष्पांजलिं ग्रहणं एषहवेवइति मं

त्रपाठः अस्मिन्नवग्रहमण्डले वासुदेवनाम्ने वैश्वानरायपञ्चपुरुषाय इदमर्चनं यज्ञपुरुषाय परमात्मने

नमः इति वैश्वानरपूजनं अथ ग्रहमंडलपूजा श्रीखंडचौचंदनं गौमौ माकौ रक्तचंदनैर्बुधजीवौच

तुष्के प्राणेशपाणें कुंकुमेस्मृतं हरिद्राकुंकुमैः सूर्यंकमुदैष्वं इदमर्चयेत् इति तिजंभुजपातुष्वेष्वं

पकैः सोमनं शतपत्रैः गुरुः पद्मोजातीपुष्पैस्तु भार्गवः मल्लिकाकुसुमैः पंगुराहुं कुरजपुष्पकैः ।

केतुं नानाविधैः पुष्पैः तुं कालोद्भवैः शुभैः प्रतिष्ठा संभवैर्मंत्रैः पञ्चद्रूपं समर्पयेत् रवैकं ड

रुकं धूपं शशिनो मधुनस्तथा भौमे सर्जरसं धूपमगुरुं च बुधे न्यसेत् सिल्लकं गुरवे दद्यात् शुक्रे वि

दृवगिरं तथा गुग्गुलं च शनेर्दद्यात् अग्निर्मोतिष्व मंत्रवित् गुडोदनं पायसं चहविष्यं यामक्षीर पायकं

दध्योदनं हविः पूर्णमासं चित्रान्नमेव च देयं पदक्रमादेतद्धि जोम्भोभोजनं बुधैः शान्तिको वायव्याभंस
कृतान्नविधिपूर्वकं धेनुः शंखं तथानडुहान् पतिवासो हयं क्रमात् कृष्णा गौरायसं छाग एता वै दक्षि
णाः स्मृताः त्रयस्त्रिंशत्यकोटीनां मुख्या ह्येता हि दक्षिणाः एतास्त [illegible] पर्यन्ति त्रयस्त्रिंशद्धि को
टयः लक्षकोटिषु ये होमे द्वात्रिंशद्देवनामताः अतोधिकं वा न्यूनं वा कुर्वन्नापस्मा [illegible] यात्॥
नवग्रहस्तथा पूज्याः क्रमाद्देवाधिदेवताः यस्य यस्याहे योद्दिष्टः सतपले नष्टजेपत् मन्त्राणां
स्वरभंगेनाशुद्धपाठेन वा पुनः पूजाहीनविधानेनाग्रहाः स्युर्यमान्विताः॥ ततत्रपस्थानं यजमा
नः पुष्पांजलिं गृहीत्वोपस्थानं कुर्यात् गणाद्याः पतिदेवताः॥ आग्नेयादीनि ऋक्षाणि योग
विष्कंभकारयः मेषाद्याराशयः सोमकाद्ध्रुवाद्यावसवस्तथा अजैकपाद्याः रुद्राश्च मरीच्याद्या ऋ
षीश्वराः वरुणाद्यास्तथा दिशा विश्वेदेवास्तथार्णवः॥ कव्यवाडादि पितरो नागाः॥ कर्कोटकाद
यः आवर्ताद्याश्च तु मेघाः क्षीराद्याः सप्तसागराः भूर्लोकाद्यास्तथा लोका वेदा ऋग्वेदकाद

यः मातृणां मंडलं चैव अर्यमाद्ध्रुवरुणवच इंद्राद्या लोकपालाश्च अधऊर्ध्वं तथैवच पृथ्वीवसेत्र
पालश्च याम्य मंडलदेवताः गंधपुष्पाक्षतैर्द्धूपैर्दीपैर्नैवेद्यपूजयाद्दक्षिणाभिश्च संतुष्टाभवंतु वरदा
मम इति मंडलपूजा ततो वेदाध्ययनं कार्यं अथ सूर्यादीनां स्तुतिः जयाकुसुमसंकाशं काश्यपे
यं महाद्युतिं तमोऽहं सर्वपापघ्नं प्रणतोस्मि दिवाकरं दधिशंखतुषाराभं क्षीरोदार्णवसंभवं नमा
मि शशिनं देवं शंभोर्मुकुटभूषणं धरणीगर्भसंभूतं विद्युत्तेजः समप्रभं कुमारं शक्तिहस्तं च मंग
लं प्रणमाम्यहं प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधं सौम्यं सौम्यगुणोपेतं नमामि शशि-
नः सुतं देवतानां ऋषीणां च गुरुं कांचनसन्निभं गुरुं भूतत्रिलोकस्य प्रणतोस्मि बृहस्पतिं हिम
कुंदमृणालाभं दैत्यानां परमं गुरुं सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहं नीलांजनसमाभासं र
विपुत्रं महाग्रहं छायाया गर्भसंभूतं वंदे भक्त्या शनैश्चरं अर्द्धकायं महावीर्यं चंद्रादित्यविमर्द
नं सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहं नीलांजनसमाभासं रविपुत्रं महाग्रहं छायायाग

३०

६३

63

र्भसंभूतं वंदे भक्त्या शनैश्चरं॥ अर्द्धकायं महावीर्यं चंद्रादित्यप्रमर्द्दनं सिंहिकागर्भसंभूतं तं राहुं प्रणमा
म्यहं॥ ज्ञानात् ज्ञानतो वापि यन्मया पापं समुपार्जितं तत्सर्वं नाशयेत्पापं ग्रहाणां च प्रकीर्त्तितं॥ इदं व्या
समुखोत्पन्नं ये पठंति समाहिताः दिवा यद्वा रात्रौ तेषां शांतिः सदा भवेत् ऐश्वर्यमतुलं वापि आ
रोग्यं पुष्टिवर्द्धनं नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनं ग्रहनक्षत्रजा पीडा तस्कराग्निसमुद्भवा
श्रवणादस्य नश्यंति व्यासो ब्रूते न संशयः॥ इति श्रीविष्णोत्तरे व्यासकृतं नवग्रहस्तोत्रं॥ अथ तर्पणं
तर्प्पयामि इति दक्षिणाभिमुखो दक्षिणादिभिर्ब्राह्मणैः तर्प्पणं करणीयं अथ पूर्णाहुतिः तत्रादौ आः ग
चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन् वीतिहोत्रा ऋतावृधः पत्ये विश्वस्य भूम्नो जुहो
मि विश्वकर्मणे विश्वाहादाभ्यं हविः॥१॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त
धाम प्रियाणि सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा॥२॥ शुक्रज्यो
तिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च शुक्रश्च ऋतपाश्चात्यंहाः॥३॥ ईदृङ् चान्यादृङ् च सदृङ् च प्रतिस

इदुमि तन्वसम्मितन्प्रभराः ४ ॐ तन्न इन्द्र वरुणश्च ॥ धर्त्ता च विधार्त्ता च विधारयः ५ ॐ तजित्व सेनजिच्च सुषे
णश्च अन्तिमित्रश्च दूरे अमित्रश्च गणः ६ ईदृक्षास एतादृक्षासः ऊषुणः सदृक्षासः प्रतिसदृक्षास एतनः मि
तासम्मितासो नोऽद्य सभरसो मरुतो यज्ञेऽस्मिन् स्वतवाश्च प्रघासी च सान्तपनश्च गृहमेधी च क्री
डी च शाकी चोज्जेषी इति पूर्णाहुतिः ॐ यत्कर्मणात्यरीरिचं यद्वा न्यूनमिहाकरम् अग्निष्टत्स्विष्टकृद्वि
द्वान्स्विष्टं सुहुतं करोतु स्वाहा इदमग्नये पूर्णा दर्वि परापत सुपूर्णा पुनरापत वस्नेव विक्रीणावहा
इषमूर्जं शतक्रतो स्वाहा इदमग्नये ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्मणो वसुनीथ
यज्ञैः ॥ घृतेन त्वं तन्वं वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ३ इदमग्नये ॐ मूर्द्धानं दिवो अर
तिं पृथिव्या वैश्वानरमृत आजातमग्निं कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा
४ ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृ
हस्पतिर्दधातु स्वाहा इदमग्नये इति रुद्रकलशे भागः इति पूर्णाहुत्यनन्तरं माहुतयः अथ वैश्वानर

६४ 64

॰ स्तुतिः इन्द्रं दैवीरनुवाक इन्द्रं दैवीर्विशो मरुतो ऽनुवर्त्मानो ऽभवन् १ इमꣳ स्तनमूर्जस्वन्तं धयापां
प्रपीनमग्ने सरिरस्य मध्ये उत्सं जुषस्व मधुमन्तमर्वन् समुद्रियꣳ सदनमाविशस्व २ घृतं मिमिक्षे
घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्य
म् ३ समुद्रादूर्मिर्मधुमाꣳ उदारदुपांशुना सममृतत्वमानट् घृतस्य नाम गुह्यं यदस्ति जिह्वा देवाना
ममृतस्य नाभिः ४ वयं नाम प्रब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः उप ब्रह्मा शृणवच्छस्यमा
नं चतुः शृङ्गो ऽवमीद्गौर एतत् ५ चत्वारि शृङ्गा त्रयो ऽस्य पादा द्वे शीर्षे सप्त हस्तासो ऽस्य त्रिधा
बद्धो वृषभो रोरवीति महो देवो मर्त्याꣳ आविवेश ६ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो
घृतमन्वविन्दन् इन्द्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः ७ एता अर्षन्ति
हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो
मध्य आसाम् ८ सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः एते अर्षन्त्यूर्मयो घृत

स्पम॰ गाऽइवेहि परणोरी षमाणाः ॥ सिंधोरिव प्राध्वने शूघनासो वातप्रमियः पतयंति यह्वाः घृतस्य
धाराः अरुषो न वाजी काष्ठा भिंदन्नूर्मिभिः पिन्वमानः १० अभि प्रवंत समनेव योषाः कल्याण्यः स्मय
मानासोऽग्निम् । घृतस्य धाराः समिधो नसंत ता जुषाणो हर्यति जातवेदाः ११ कन्या इव वहतु
मेतवा उ अंज्यंजाना अभि चाकशीमि यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराः अभि तत्पवंते
ध्वं भुवनमधिश्रितमंतः समुद्रे हृद्यंतरायुषि अपामनीके समिथे य आभृतस्तमश्याम मधुमंतं त
ऊर्मिम् १४ इति वैश्वानरसूक्तिः ॐ सं हे षमित्याने मर दक्षिणा चतुर्भिर्ब्रह्मार्भ्यां यं च भिरेव च हूयते च
पुनर्होम्यां समे विष्णुः प्रसीदतु मरणीनाविमोकः ह्री मांते सं कल्पः आघारावाज्यभागादिपूर्णाहुति
पूर्णाहुति पर्यंतं यद्द्रव्यपादक यावत्संख्याक येन येन मंत्रेण हुत यस्मै यस्मै देवतायै सा सा देवता प्रीयतां
ने देवाः शांतिदाः पुष्टिदा वरदा भवंतु घृतस्य नवग्रहमखस्य समग्रार्थं इदं पूर्णपात्रं ... तुभ्यमहं
घ्रददे तेन कर्मांगदेवता प्रीयतां घृतस्य नवग्रहमखस्य समग्रार्थं यथाशक्त्या ... संज्ञाकान ब्रा

त्सराणा भोजयिष्ये तेन कर्म्मांगत्वेन न्यूनातिरिक्तदोषपरिहारार्थं भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्म
णेभ्यो हं संप्रददे तेन कर्मोपस्था त्र्यायुषं जमदग्नेरिति भस्मवंदनं त्र्यायुषं जमदग्नेरिति भस्मवंदने
त्र्यायुषं जमदग्नेरिति ललाटे कश्यपस्य त्र्यायुषमिति दक्षिणस्कंधे यद्देवेषु त्र्यायुषमिति वामस्कंधे
तन्नोऽस्तु त्र्यायुषमिति हृदये ॐ शिवो नामासीति मेत्रेण यजमानः क्षौरं गृह्णीयात् ॐ शिवो
नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिंसीः निवर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रा
यस्पोषाय सुप्रजास्त्वाय सुवीर्याय पठति

अथाभिषेकः पंचकुंडात्मकाग्निमतोभिषेकं समाचरेत् आदाय रुद्रकलशं द्विजैः सार्द्धं ततो गुरुः
पंचभिर्वा रुद्रजाप्येन वशं कुर्यात्सदाशिवं ईश्वरोहि वशे यस्य तस्य वश्यं जगत्त्रयं अथापि वारुण

मंत्रान् गलमश्वत्थपल्लवैः गुडत्वोधनसंमिश्रैस्तत्सकलत्रकं आम्रोदुम्बरन्यग्रोधजंबूदूर्वाः सम
न्वलकाः पुष्पाः सकुशाः प्रोक्ताविद्भिरभिषेचनेतत्राभिषेकमंत्रावैदिकाः ॐ आपो हि ष्ठा मयोभु
वस्ता न ऊर्जे दधातन महेरणाय चक्षसे १ यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव
मातरः २ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः ३ ॐ त्रातारमिन्द्रमवि
तारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रं मू ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धा
त्विन्द्रः ४ वरुणस्य ऋतसदनमासीत् ५ भगप्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः भग
प्र नो जनय गोभिरश्वैर्भग प्र नृभिर्नृवंतः स्याम ६ इदमापः प्रवहतावद्यं च मलं च यत् यश्चा
भिदुद्रोहानृतं यच्च शेपे अभीरुणम् आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ७ समुद्रा
यत्वा वाताय स्वाहा शरीराय त्वा वाताय स्वाहा अनाधृष्याय त्वा वाताय स्वाहा अप्रतिधृष्या
यत्वा वाताय स्वाहा अवस्यवे त्वा वाताय स्वाहा अनाधृष्याय त्वा वाताय स्वाहा शि

३३

१६६ 66

सिदायत्वाबाताय स्वाहा ८ पुनंतु मादेव जनाः पुनंतु मनसा धियः पुनंतु विश्वा भूता जातवे
दः पुनीहि मां एवं आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् भवा वाजस्य सङ्गथे १० पंच न
द्यः सरस्वतीमपि यंती सस्रोतसः सरस्वती तु पञ्चधा सो देशो भवत्सरित् ११ शिरो मे श्रीर्य
शो मुखं त्विषिः केशाश्च श्मश्रूणि राजा मे प्राणो अमृतं सम्राट् चक्षुर्विराट् श्रोत्रं १२ जिह्वा
मे भद्रं वाङ्महो मनो मन्युः स्वराड् भामः मोदाः प्रमोदाः अंगुलीरंगानि मित्रं मे सहः १३ बाहू मे ब
लमिन्द्रियं हस्तौ मे कर्म वीर्यं आत्मा क्षत्रमुरो मम १४ पृष्ठीर्मे राष्ट्रमुदरमंसौ ग्रीवाश्च
श्रोणी ऊरू अरत्नी जानुनी विशो मेंगानि सर्वतः १५ नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिः १६ देव
स्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः सा
म्राज्येनाभिषिंचाम्यसौ १७ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अश्विः
नोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिंचामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिंचा॰

मीढ्वस्मै इंद्रियेणाबलाय श्रियै यशसेभिषिंचामि १८ पलाशं भवति तेन ब्राह्मणोभिषिंचति ब्रह्म वै पला
शो ब्रह्मणैवैनमेतदभिषिंचति यवकल्पांजुहोति प्राणा वै कल्प्या अन्नं वै प्राणा अन्नं तेनैवैनमेतद
भिषिंचति १९ सर्वेषां वा एष वेदानां रसो यत्साम सर्वेषामेवैनमेतद्वेदानां रसेनाभिषिंचति २०
इति वैदिकामंत्राः अथ पौराणिकाः तत्र प्रार्थना सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः आ
यांतु मम शांत्यै दुरितक्षयकारकाः इमनेनयजमानः प्राप्येयेत् सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुम
हेश्वराः वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः प्रद्युम्नश्चानिरुद्धश्च शुभमिच्छंतु पतेसदा नारदा
द्या ऋषिगणा ये चान्ये च तपोधनाः भवंतु यजमानस्य आशीर्वादपरायणा आखंडलोग्निर्भग
वान् यमो वै निऋतिस्तथा वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मा चैव तथानंतो दिक्
पालाः पांतु वः सदा कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कां
तिश्च मातरः एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः आदित्यश्चंद्रमा भौमो बुधो जीवः सितो

ऽर्कजः महास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताश्चाः आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः पि
तरश्च मघच्छंतु मंगलानि दिने दिने देवदानवगंधर्वा यक्षराक्षसपन्नगाः ऋषयो मानवो गावो देवमा
तरश्च वत्स नागपत्न्यो द्रुमा नानागादेसाश्चाप्सरसां गणाः अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि
निच औषधानि च रत्नानि कालस्यावयवाश्च ये सागराः पर्वतास्तीर्थानि जलानि सरितस्तथा एते
त्वामभिषिंचंतु सर्वकामार्थसिद्धये वत्सरायनमासाश्च तिथिवाराश्च नाडिकाः मुहूर्तास्त्वामि
षंचंतु वसंत—— सरा पुराणानि च सर्वाणि सेतिहासानि यानि च सांख्यमीमांसकादीनि शुभ
दानि भवंतु ते गायत्री चैव सावित्री शची लक्ष्मीः सरस्वती मडानी मानवः सर्वो भवंतु वरदास्तवः
इति मंत्राः पलवं रुद्र कुंभेन कुर्याद्विवाभिषेचने सर्वान्कामानवाप्नोति तथा वै महदुत्तमात्
विवाहोत्सवयज्ञेषु राज्यप्राप्तौ महीपतिः तत्रारोधन वद्धो च कुर्याद्ग्रह मरंद वुधः वितृशांति
र्हिनास्ति यदि स्याद्ग्रह पीडने स्वल्पद्रक्षेणाभावेन प्रपन्नाः स्युर्नवग्रहाः अत्र हीनो दहेदा।

ष्ट्रं मंत्रहीनस्तु ऋत्विजं यजमानमदाक्षिणं नास्ति यज्ञसमो रिपुः एवं स्नापयित्वा एवौक्तकल्पितैः स
र्वौषधिगंधादिभिर्यजमानं स्नापयेत् पुनः शुद्धोदकेन ततः शुक्लमाल्यांबरधरः शुक्लगंधानुलेप
नः सत्रग्नेः पश्चादुपविश्य ततः ब्राह्मणेभ्यो दक्षिणां दद्यात् तत्रायं प्रयोगः अद्येत्यादि कालज्ञा
नं कृत्वास्य नं कृत्वास्यनेस्म्वा वग्रहमखकर्मणः सांगतासिद्ध्यर्थं अमुकगोत्रायामुकप्रराया
मुकवेदाध्यायिनेऽमुकशर्मणे ब्राह्मणाय यावर्चायेमां दक्षिणां तुभ्यमहं संप्रददे एवं ऋत्विग्भ्यश्च दद्यात्
ततो यजमानोऽन्यानपि ब्राह्मणान्पूजयेत् ततो यज्ञसमृद्धये दक्षिणां कुर्यात् ततस्तिलकं ॥ आतो भद्राय
रनं दीर्घायुत्वाय बलाय वर्चसे सुप्रजास्त्वाय सहसा अथो जीव शरदः शतं

६८
68

पश्चाद्दष्टि द्वचनं अथ विसर्ज्जनं सिद्धायां तु ध्रुवो मध्ये गोमये च प्रजापतिः वरुणो जलमध्ये तु कः
लशश्चैव सागरे १ गणेशो पातु होमाद्रौ ब्रह्मा ब्रह्माण्डके तथा विष्णुः प्रयातु वैकुंठे कैलाशे च महेश्व
रः कमला विष्णुपार्श्वे तु काश्मीरे तु सरस्वती योगपीठे तु योगिन्यो मातरो मातृमंडले रविः कलिंग
देशे तु यमुनायां तु चंद्रमाः भूमिपुत्रस्त्व योध्यायां कैलाशे यातु चंद्रजः सिंधुदेशे गुरुर्यातु शुक्रो देशे गु
रुर्यातु शुक्रो भोजकटे तथा शनिः सौराष्ट्रके देशे विधुंतुदः केतु स्वपर्वते यातु स्वस्थाने अग्निहदेव
ताः अमरावंती प्रयात्विंद्रो हविषा मंडले नलः यमो यमपुरीं यातु नैऋत्येय ऋक्षनायकः वरुणो जलदस्था
ने वायुर्वायव्यमंडले सोमो लकापुरीं यातु रुद्र ईशिवमंडले ब्रह्मांडे गच्छतु ब्रह्मा विष्णुर्वैकुंठमंदिरे अ
गस्त्यो नु महेंद्रं ध्रुवो वै मेरुमंडले ध्रुवं प्रदक्षिणीकृत्य मरीच्याद्याः ऋषीश्वराः स्था स्थाने देवता
यातु क्षेत्रपालो महाबलः राशिनक्षत्रयोगाश्च यातु नक्षत्रमंडले वसवो जाह्नवीमध्ये यातु रुद्रपुरीं

शिवः आदित्याः स्वालयेयांतु लोकपालाः स्वमंडले समुद्राः पर्वता यांतु योगिन्यो रुद्रपीठके अन्ये
देवाश्च स्वंस्थानं यांतु होतुश्च शासनात् मंडपे स्थापिता देवाः स्वस्थानेषु व्रजंतु ते वनस्पतिर्गिरियां
तु वेदाश्च ब्रह्मसंस्थितिं ग्रहाणां वो नरेंद्राश्च ब्राह्मणाश्च विशेषतः पूजिताः प्रति पूज्यंते सावधाना भ
वंतु ते आगतास्तु यथान्यायं पूजितास्तु यथाविधि कृत्वा मयि देवा यत्र स्थानस्त्व गच्छंतां यजमा
नहितार्थाय पुनरागमनाय च शत्रूणां बुद्धिनाशाय मित्राणामुदयाय च यांतु देवगणाः सर्वे पूजा
मादाय मामकीं इष्टकामसमृद्ध्यर्थं पुनरागमनाय च उपह्वरे गच्छ यज्ञपते सह स्वकैर्बालकैः सर्वे
वीरस्तं जुषस्व स्वाहा इति विसर्जनम् अथाच्छिद्रप्रार्थनम् यच्छिद्रं तपच्छिद्रं यज्ञकर्मणि सर्वं
भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः ब्राह्मणा जंगमं तीर्थं निर्जलं सर्वकामिकं तेषां वाक्योदकेनै
व शुध्यंति मलिना जनाः उपवासो व्रतं चैव स्नानं तीर्थफलं तपः विप्रैः संपादितं यस्य संपन्नं त
स्य तत्फलं इति ब्राह्मणेभ्योऽच्छिद्रं प्रार्थयेत् सर्वमच्छिद्रमस्तु इति ब्राह्मणाः ब्रूयुः अथ विसृष्टा

र्थेना मम लक्ष्मीपते स्वामिन् यज्ञनाय सनातन यज्ञेनानेन संतुष्टो भव ॥ खिलमपाच्युत २ मंत्रहीनं भक्तिही
नं सुरेश्वर यत्कृतं हि मया देव प॰रि पूर्णं तदस्तु मे यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु न्यूनं संपूर्ण
तां याति सद्यो वंदे तमच्युतं प्रमादात्कुर्वतां कर्म च्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति
श्रुतिः इति मार्जनं ततो ब्राह्मणभोजनं ततः स्वबंधुजनैः सह भोजनं कुर्यात् इदं शांतिकं विना होत्स
वयज्ञप्रतिष्ठास्वविघ्नपरिसमाप्त्यर्थं कर्त्तव्यं इति श्रीवशिष्ठी शांतिः समाप्ता ॥ भा॰ग्रहादश संयुक्तं तिथि
वारसमन्वितं सप्तद्वीपासमायुक्तं चतुर्भिर्भागमाहरेत् एकेन वसते स्वर्गे द्वाभ्यां पाताल गे तथा त्रिभश्चा
मृत्युलोकेषु श्मशाने वासः प्रकीर्तितः आकाशे शोकसंतापौ पाताले मरणं ध्रुवं पृथिव्यां सुखमाप्नि
र्वह्नौ होमात्प्रजायते इति स्थितेज्ञानं सूर्येषु काव्यनराचाद्यादि तस्य यं च यं आदित्यश्च शुक्रः शनिश्चंद्रः कु
जस्तथा जीवो राहुश्च केतुश्च होमे क्रूरा न शोभनाः आदित्ये च भवेच्छोको बुधे संपन्निरन्तमाप्नुके स्याद्धध 
नावाप्तिः प्राणो पीडा च जायते चंद्रे भवति लाभश्च भौमे च वधबंधनं गुरौ परमकल्याणं राहो हानिश्च
सर्वदा केतौ च मरणं संदेहं वह्नि च कमुरा हतं ॥ इति होमाहुति ज्ञानं ॥ ❁ ॥ ❁ ॥